यंचैववैवयमात् नगर्भवासभीर्यत्रतत्स्तेत्रंकोनसंश्रयेत् विनासांख्येनयोगेनवि
नास्वात्मविलोकनं ७२ विनाव्रततपोदानैःश्रेयोवैप्राणिनामिह स्नाने
नसर्वतीर्थानां यः स्यात्सुकृतसंचयः॥७३॥ततोधिकतरंप्रोक्तंमाथुरेममंडले
॥तामापिगत्वातामस्यात्सदेवत्वेनसंशयः॥७४॥सदाकृतयुगंचात्रसदावैचो
त्तरायणं॥चतुर्णामपिवेदानांपुण्यमध्ययनाद्भवेत्॥७५॥तत्पुण्यंजायतेपुंसांम
थुरांस्मरतांसतां॥यत्पुण्यमश्वमेधेनयत्पुण्यंराजसूयतः॥७६॥मथुरायांतदाप्नो
तित्रिरात्राशयनाद्ध्रुवः॥७६॥इत्यादिवाराहपुराणेमथुरामाहात्म्येचक्रतीर्थप्रभा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वो नामैकादशोऽध्यायः ॥ ११ ॥ श्रीवाराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुं
धरे वैकुंठतीर्थमासाद्य यद्वृत्तं हि पुरातनं १ मिथिला च पुरी रम्या जनकेनाहृपा
लिता मिथिलावासिनो लोकास्तीर्थयात्रां समागताः २ ब्राह्मणाः क्षत्रिया वैश्
याः शूद्राश्चैव वसुंधरे स्नात्वा शोकरके तीर्थे आगता मथुरां पुरीं ३ तेषां तु भ
भक्तिरुत्पन्ना मथुरां प्रति सुंदरि वैकुंठतीर्थमासाद्य सर्वे ते मनुजाः स्नुताः ४
तेषां मध्ये ब्राह्मणोऽपि ब्रह्महत्यासुचिह्नितः रुधिरस्य तु धारा च स्रवंति तस्य हस्त
तः ५ प्रत्यक्षं हि पश्यते सर्वे ब्रह्महत्यास्वरूपिणी स्रवंतीर्थस्नातस्यापि ब्राह्मणस्य
हिंसा तदा ६ न गता पूर्वमेवासी वैकुंठे स्नानमाचरन् न सा वै दृश्यते धारा तन
स्ते विस्मयं गताः ७ किमेतत्किमिति प्राहुर्धीरां प्रति वसुंधरे देवो ब्राह्मणरूपेण लो
कान्सर्वांश्च पृच्छति ८ केन कारणदोषेण धारा त्वस्त्वागता द्विजं ते सर्वे कथयामा
सुर्ब्राह्मणस्य विचेष्टितं ९ वैकुंठे तु निमग्नोऽयं ब्रह्महत्यागता ततः विस्मयो नात्र
कर्त्तव्यस्तीर्थस्येदं फलं महत् १० इत्युक्तस्तैर्देवदेवस्तत्रैवांतरधीयत एवं प्रभा २४
वस्तीर्थस्य वैकुंठस्य वसुंधरे ११ वैकुंठतीर्थे यः स्नाति मुच्यते सर्वपातकैः सर्व

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥२२॥ श्रीवाराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि ऋषि
कुंडेति संज्ञकं ॥ नाम्ना गंधर्वकुंडं तु तीर्थानां तीर्थमुत्तमं ॥२३॥ तत्र स्नातो नरो देवि गं
धर्वैः सह मोदते ॥ तत्राथ मुंचते प्राणान्मम लोकं स गच्छति ॥२४॥ विंशतिर्योजनानां
तु माथुरं मम मंडलं ॥ इदं पद्मं महाभागे सर्वेषां मुक्तिदायकं ॥२५॥ कर्णिकायां स्थि
तो देवि केशवः क्लेशनाशनः ॥ कर्णिका योजनं चात्र सदाहं तत्र संस्थितः ॥२६॥
कर्णिकायां मृतायेनु ते नरा मुक्तिभागिनः ॥ पत्रमध्ये मृतायेतु तेषां मुक्तिर्वसुंधरे
॥२७॥ पश्चिमे तु हरिं देवं गोवर्द्धननिवासिनं ॥ दृष्ट्वा तं देवदेवेशं किं मनः परितप्य
से ॥२८॥ उत्तरेण तु गोविंदं दृष्ट्वा देवं परं शुभं ॥ नासौ पतति संसारे यावदाहूतसं
प्लवं ॥२९॥ विश्रांतिसंज्ञके देवं पूर्वपत्रे व्यवस्थितं ॥ तं दृष्ट्वा तु नरो याति मुक्तिं नास्त्यत्र
संशयः ॥३०॥ दक्षिणेन तु मां विद्धि प्रतिमां दिव्यरूपिणीं ॥ महाकायां सुरूपां च केश
वाकारसन्निभां ॥३१॥ मां दृष्ट्वा मनुजो देवि ब्रह्मणा सह मोदते ॥ कृते युगे तु राजासी
न्मांधाता नाम नामतः ॥३२॥ तेनाहं तोषितो देवि भक्तियुक्तेन चेतसा ॥ तस्य तुष्टेन
हि मया प्रतिमेयं समर्पिता ॥३३॥ तेनेयं पूजिता नित्यमात्मभक्तिमभीप्सता ॥ य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥म॰मा॰॥
॥२५॥

दानुमथुरांप्राप्यलवणेननिपातितः॥२४॥तदेयंप्रतिमादिव्यामथुरायांव्यवस्थि
ता॥पुण्याचप्रतिमादिव्यातेजसीदिव्यरूपिणी॥२५॥कपिलोनामविप्रर्षिर्ममभ
क्तिपरायणः॥मनसानिर्मितातेनवाराहीप्रतिमाशुभा॥२६॥कपिलोध्यायते
नित्यमर्चतेचदिनेदिने॥इंद्रेणाराधितोदेविकपिलोमुनिसत्तमः॥२७॥तस्यप्री
तोददौदेवंवाराहंदिव्यरूपिणं॥देवलब्ध्वेतुवाराहेशक्रोहर्षसमन्वितः॥२८॥ध्या
यंश्चपूजयन्नित्यंगंधमाल्यानुलेपनैः॥इंद्रेणतुतदाप्राप्तंदिव्यज्ञानमनुत्तमं॥२९॥
ततःकालेनमहतारावणोनामराक्षसः॥इंद्रलोकंगतःसोथशक्रंजेतुंमहाबलः॥
३०॥शक्रेणसहसंगम्यततोयुद्धंप्रवर्त्तितं॥रावणेनजितादेवाशक्रश्चैवमहा
बलः॥३१॥बध्वाचेंद्रंमहाबाहुंशक्रस्यभवनंगतः॥प्रविश्यरावणस्तत्रगृहेरत्ने
विभूषिते॥३२॥दृष्टाकपिलवाराहंशिरसाधरणींगतः॥तेनसंमोहितोदेविराव
णोलोकरावणः॥३३॥रावणउवाच॥त्वंतुमहेसिमेदेवधरणीधरमाधव॥दामोद
रहृषीकेशहिरण्याक्षविदारण॥३४॥वेदगर्भनमस्तेतुवासुदेवनमोस्तुते॥कू ॥२५॥
र्मरूपधरश्रेष्ठनारायणनमोस्तुते॥३५॥मत्स्यरूपधरंदेवंमधुकैटभनाशनं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

निरीक्षितुं न शक्नोमि स्प्रष्टुं नैव च सुव्रत ॥३६॥ देवदेव नमस्तुभ्यं भक्तानामभय
प्रद ॥ मम त्वं भक्तिनम्रस्य प्रसादं कुरु सर्वदा ॥३७॥ सौम्यरूपो भव देवो वाराहो
लोकविश्रुतः ॥ सौम्यां तनुं च मे दृष्ट्वा रावणो देवकंटकः ॥३८॥ सन्निधानम
नुप्राप्य पुष्पकारोहणोत्सुकः ॥ तमेद्रष्टुं न शक्नोति रावणो विस्मयं गतः ॥३९॥
शंकरेण पुरा सार्द्धं कैलाशस्तु मयोद्धृतः ॥ देव त्वं स्वल्पकायोसि नाहमुद्धरणे त
मः ॥४०॥ प्रसीद देवदेवेश सुरनाथ नमोस्तु ते ॥ अहं त्वां नेतुमिच्छामि पुरीं लं
कामनुत्तमां ॥४१॥ श्रीवाराह उवाच ॥ अवेक्ष्य वोसिरद्वत्स त्वं कुतो भक्तिस्तवेदृशी
॥ वाराहस्य वचः श्रुत्वा रावणो वाक्यमब्रवीत ॥४२॥ त्वद्दर्शनात्समुत्पन्ना भक्ति
रव्यभिचारिणी ॥ महात्मं त्वं नयिष्यामि देवदेव नमोस्तु ते ॥४३॥ भक्तिमुद्वहत
स्तस्य लघुर्वेशो भवत्तदा ॥ पुष्पके तु समारोप्य देवं त्रैलोक्यविश्रुतं ॥४४॥ आन
यामास लंकायां स्थापितोहं स्वमालये ॥ तदा स्थितो हं लंकायां रावणेन सुपूजि
तः ॥४५॥ अयोध्याया गतो रामो हंतुं राक्षसपुंगवं ॥ लंकायां रावणं हत्वा राघवे
न महात्मना ॥४६॥ विभीषणः स्वयं राज्ये स्थापितोथ वसुंधरे ॥ विभीषणेन राम

स्य सर्वस्वं च निवेदितं ॥ ४७ ॥ श्रीराम उवाच ॥ सर्वस्वेनास्ति कार्यं मे तव रक्षो वि
भीषण देवो मे दीयतां रक्षः शुक्लोकाद्य आगतः ४८ अहमस्य हनिपूजामिदे
वं वाराहरूपिणं अयोध्यायां च नेष्यामि लंकायां गच्छ राक्षस ४९ ततः समर्प
यामास कपिलं दिव्यरूपिणं पुष्पके तु समारोप्य अयोध्यायां समागतः ५०
अयोध्यायां स्थितं देवं पूजयामास तं तदा गतं वर्षसहस्रं तु दशैकं च वसुंधरे
॥ ५१ ॥ एतस्मिन्नंतरे भूमे माथुरा मम वल्लभाः लवणेनार्दिताः सर्वे रामं ते शरणं
गताः ॥ ५२ ॥ माथुरा ऊचुः ॥ राम राम महाबाहो पुराण पुरुषोत्तम यज्ञोस्माकं तु
देवेश नाशितो लवणेन हि ५३ तेषां तद्वचनं श्रुत्वा रामो वचनमब्रवीत् भवं
तो मम पूज्या हि रक्ष्याः पोष्याश्च सर्वदा ५४ येषां पूजनमात्रेण परमात्मा प्रह
ष्यति अयं सुमित्रासूनुर्मे शत्रुघ्नो नाम विश्रुतः ५५ तस्य क्रूरस्य दुर्बुद्धे युद्धे
प्रतिकरिष्यति लवणस्य वधे रामः शत्रुघ्नं प्रेषयत्तदा ५६ कृतप्रणामः शा
त्रुघ्नो राघवाय महात्मने चतुरंगबलोपेतो ह्यगमन्मथुरां पुरीं ५७ गत्वा तु
राक्षसश्रेष्ठं लवणं रौद्ररूपिणं घातयित्वा तु शत्रुघ्नः प्राविशन्मथुरां पुरीं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५८ ब्राह्मणान्स्थापयित्वातु मम तुल्यान्महौजसः षट्त्रिंशतिसहस्राणि वेदवे
दांगपारगान् ५९ अन्यो माथुरो यत्र चतुर्वेदस्तथापरः चतुर्वेदं परित्यज्य मा
थुरं परिपूजयेत् ६० कुलीवलो दुराचारो धर्ममार्गपराङ्मुखः ईदृशोपि पूजनी
योपि माथुरो मम रूपधृक् ६१ माथुराणां तु यद्रूपं तन्मे रूपं वसुंधरे एकस्मि
न्भोजिते विप्रकोटिर्भवति भोजिता ६२ न केशवसमो देवो न माथुरसमो द्विजः
न विश्वेशसमं लिंगं सत्यं सत्यं वसुंधरे ६३ माथुरा मम रूपा हि माथुरा मम व
ल्लभाः माथुरे परितुष्टे तु तुष्टोहं नात्र संशयः ६४ मथुरा परमात्मानो माथुराः प
रमाशिवः माथुरा मम देहा वै सत्यं सत्यं वसुंधरे ६५ भार्गवाख्यः पुनर्भूत्वा पूज
यिष्यामि माथुरान् सूर्यवंशोद्भवश्चैव शत्रुघ्नोहं वसुंधरे ६६ अर्चयिष्या
मि तानेव माथुरान्भूतधारिणि यदुवंशे भविष्यामि पूजयिष्यामि माथुरान् ६७
एतत्ते कथितं भूमे माथुराणां स्वरूपकं येषां पूजनमात्रेण तुष्टोहं लवने सदा ६८
लवणस्य यथावृत्तं कथितं तु वसुंधरे अयोध्यायां जगामाशु शत्रुघ्नो रघुनंदनः
लवणस्य वधं श्रुत्वा राघवो वाक्यमब्रवीत् ६९ वरं वरय शत्रुघ्न यत्ते मनसि रो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चते राघवस्य वचः श्रुत्वा शत्रुघ्नो वाक्यमब्रवीत् ७० यदि तुष्टोसि मे देववरा
र्हो यदि चाप्यहं दीयतां मम देवोयं यदि मे वरदो भवान् ७१ शत्रुघ्नस्य वचः श्रु
त्वा राघवो वाक्यमब्रवीत् नय शत्रुघ्न देवं त्वं वाराहं दिव्यरूपिणं ७२ धन्योसौ
माथुरो लोको धन्यासौ मथुरापुरी धन्यास्ते माथुरा लोकाः कपिलं पश्यंति ये स
दा ७३ दृष्टः स्पृष्टस्तथा ध्यातः स्नापितश्च दिने दिने अनुलिप्तश्च शत्रुघ्न सर्वं
पापं व्यपोहति ७४ पूजितः स्नापितो देवो दृष्टो येश्च दिने दिने सर्वं हरति पाप्मा
नं मोक्षं चैव प्रयच्छति ७५ इत्युक्त्वा राघवस्तस्मै देवं प्रादाद् वसुंधरे देवमादाय
शत्रुघ्नो ह्यगमन्मथुरां पुरीं ७६ ब्राह्मणैः स्थापयित्वा तु आगच्छन्मम सन्निधौ
तत्र मध्ये च संस्थाप्य पूजयामास राघवः ७७ अनेन क्रमयोगेन मथुरायां स्थि
तस्सदा गयापिंडप्रदानेन यत्फलं ज्येष्टपुष्करे ७८ तत्फलं समवाप्नोति ।
श्वेतं दृष्ट्वा सदा नरः विश्रांतिसंज्ञकेन दृष्टो विंदेच तथा हरौ ७९ केशवे दी
र्घविष्णौ च तदेव फलमश्नुते उदये मामकं तेजः सदा विश्रांतिसंज्ञके ८० म
ध्याह्ने मामकं तेजो दीर्घविष्णौ व्यवस्थितं केशवे मामकं तेजो दिनभागे चतु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्थके ॥ ८१ ॥ एषा दिव्या पुरी देवि नित्यकालं सुगोपिता ॥ भक्त्या त्वं मम शिष्या च क
थिता ते वसुंधरे ॥ ८२ ॥ इत्यादिवाराहपुराणे मथुरामाहात्म्ये कपिलमाहात्म्यं द्वा
दशोऽध्यायः ॥ १२ ॥ श्रीवाराह उवाच ॥ अस्ति गोवर्द्धनं नाम क्षेत्रं परमदुर्लभं मथु
रायाः पश्चिमे भागे अदूराद्योजनद्वयं १ हृदं तत्र महाभागे द्रुमगुल्मलतायुतं
चत्वारि तत्र तीर्थानि पुण्यानि च शुभानि च २ ऐंद्रं पूर्वेण पार्श्वे च यमतीर्थं
तु दक्षिणे वारुणं पश्चिमे तीर्थं कौबेरं चोत्तरेण तु ३ तत्र मध्ये स्थितो भद्रे क्री
डयिष्ये यदृच्छया तत्रैव शक्रतीर्थे तु स्नानं कुर्याद्दृढव्रतः ४ मोदते शक्रलोके
तु सर्वद्वंद्वविवर्जितः दक्षिणे यमतीर्थे तु स्नानं कुर्याद्दृढव्रतः ५ यमस्य भव
नं गत्वा मोदते कृतनिश्चयः तत्रायमुंचते प्राणान् लोभमोहविवर्जितः ६ यम
लोकं समुत्सृज्य मम लोकं स गच्छति तत्रैव वारुणं तीर्थमासाद्य स्नानमाचरेत्
७ वारुणं भवनं गत्वा मुच्यते सर्वकिल्बिषैः तत्रायमुंचते प्राणान् कामक्रोधवि
वर्जितः ८ वारुणं लोकमुत्सृज्य मम लोके स गच्छति कौबेरतीर्थे यः स्नाति कौबे
रस्थानमाप्नुयात् ९ तत्रायमुंचते प्राणान् सर्वद्वंद्वविवर्जितः कौबेरं लोकम

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्यज्यममलोकंसगच्छति १० तत्रमध्येचयःस्नातिक्रीडतेचमयासह अथात्रमुं
चतेप्राणान्ममलोकंसगच्छति ११ अन्नकूटंततःप्राप्यात्तस्यकुर्यात्प्रदक्षिणां
नतस्यपुनरावृत्तिर्दैविसत्संब्रवीमिते १२ स्नात्वामानसगंगायांदृष्ट्वागोवर्द्धनंह
रिं अन्नकूटंपरिक्रम्यकिंमनःपरितप्यसे १३ सोमवारेत्वमावास्यांप्राप्यगो
वर्द्धनंनरः॥दत्वापिंडंपितृभ्यश्चराजसूयफलंलभेत्॥१४॥गयापिंडप्रदानेन
यत्फलंप्राप्यतेनरैः॥तत्फलंप्राप्यतेतत्रेनात्रकार्याविचारणा॥१५॥गोवर्द्धनंप
रिक्रामन्दृष्ट्वादेवंहरिंप्रभुं॥राजसूयाश्वमेधाभ्यांफलंप्राप्नोत्यसंशयः॥१६॥ऋ
षिरुवाच॥परिक्रमान्नकूटस्यविधिनाक्रियतेकथं॥प्रभावगुणमाहात्म्यंतद्भ
वान्वक्तुमर्हति॥१७॥श्रीवाराहउवाच॥मासिभाद्रपदेयातुशुक्लेचैकादशीशुभा
गोवर्द्धनेसोपवासःकुर्यात्तत्रप्रदक्षिणां १८ स्नात्वामानसगंगायांप्रभातउ
दितेरवौ गोवर्द्धनंप्रसाद्यैवंहरिंचाचलमूर्द्धनि १९ पुंडरीकंततोयायात्कुंडे
स्नायाद्विधानतः देवान्पितृन्समभ्यर्च्यपुंडरीकमथार्च्चयेच २० सर्वपापवि
निर्मुक्तःप्रयातिभवनंहरेः कुंडंचाप्सरसंनामप्रसन्नसलिलाशयं २१ तत्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्नानंतर्पणंचकृत्वा [illegible] फलमवाप्नुयात् राजसूयाश्वमेधाभ्यां धूतपाप्मानसंश
यः २२ तीर्थंसंकर्षणंयायाद्धलभद्रेणरक्षितं गोहत्यापूर्वसंलग्नाउत्तीर्णातत्र
दूरतः २३ स्नायाऊर्द्धंतिसान्निध्यंनात्रकार्याविचारणा अन्नकूटस्यसान्नि
ध्येतीर्थंशक्रविनिर्मितं २४ तत्रकुंभेनपूजार्थमिंद्रेणविहितंमखं महानिं
द्रस्यचोत्थानंभक्ष्यभोज्यसमन्वितः २५ कृत्वाकृष्टिकरासाद्धाद्रिंद्रेणसह
संकथा इंद्रस्यवर्षतोत्यत्यंगवांपीडाकरंजलं २६ तासांरक्षार्थंसंस्तभ्यधृ
तंगिरिवरंतदा सोन्नकूटइतिख्यातःसर्वतःशक्रपूजितः २७ देवादेव्यस्तथा
गावोन्नृषिभिश्चसमन्विताः पूजितास्तर्पिताःश्रेष्ठाःक्रमंतेविष्णुनापुरा २८
तस्मिन्स्नानेतर्पणेचशतक्रतुफलंलभेत् ततःकदंबखंडाख्यंकुंडंतुविमलो
दकं २९ स्नात्वापितॄन्समभ्यर्च्यब्रह्मलोकमवाप्नुयात् ततोगच्छेद्देवगिरिंशत
बाहुसमुच्छ्रितं ३० तत्रस्नानाद्दर्शनाच्चवाजपेयफलंलभेत् महादेवंततोग
त्वाहत्यायात्राफलंलभेत् ३१ कुंडेस्नात्वापितॄंस्तर्प्यकृतकृत्योदिवंव्रजेत्
गंगायाश्चोत्तरंयायाद्देवदेवस्यचक्रिणः ३२ अरिष्टेनसमंयत्रमहद्युद्धंप्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स·मा·
२९

वर्त्तितं घातयित्वा ततस्तिन्नरिष्टं वृषरूपिणं ३३ कोपेन पार्ष्णिघातेन महा
स्तीर्थं प्रवर्त्तितं वृषभस्य वधोद्भेय आत्मनः शुद्धिमिच्छता ३४ स्नातस्तत्र तदा
कृष्णो व्रजं हत्वा सगोपकः विपाप्माराधां प्रोवाच कथं भद्रं भविष्यति ३५ वृषो
हतो मयाचार्य मरिष्टः पापसूचकः तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारि
णं ३६ स्वनाम्ना विहितं कुंडं कृतं तीर्थमदूषितं राधाकुंडमिति ख्यातं सर्वपा
पहरं शुभं ३७ अरिष्टराधाकुंडाभ्यां स्नानात्फलमवाप्यते राजसूयाश्वमे
धाभ्यां नात्र कार्या विचारणा ३८ गोहत्याब्रह्महत्याद्याः पापं क्षिप्रं प्रणश्यति ती
र्थं हि मोक्षराजाख्यं नृणां मुक्तिप्रदायकं ३९ यस्य दर्शनमात्रेण सर्वपापैः प्रमु
च्यते इंद्रध्वजो हि यं यत्र पूर्वस्यां दिशि वै कृतं ४० इंद्रध्वजमिति ख्यातं तीर्थं
चैव हि मुक्तिदं तत्र स्नाता दिवं यान्ति ये मृतास्ते ऽपुनर्भवाः ४१ ततो हरेर्निवेद्या
शु यात्रा फलमनंतकं चक्रतीर्थे नरः स्नात्वा पंचतीर्थाख्यकुंडके ४२ समाप्य
तीर्थयात्रां तु रात्रौ जागरणं हरेः गोवर्द्धनस्य कर्त्तव्यं महापातकनाशनं ४३
एकादश्यां तदा रात्रौ कृत्वा जागरणं शुभं द्वादश्यां मुषसि स्नात्वा पिंडं निर्वाप्य शो

२९

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्तितः ४४ पितॄणांमुक्तिदंतेषांयएवंकुरुतेनरः सर्वपापविनिर्मुक्तःपरंब्रह्मा
धिगच्छति ४५ एतत्तेकथितंभद्रेअन्नकूटपरिक्रमं यथानुक्रमयोगेनत्तयो
षादेपिचोच्यते ४६ यात्तच्छृणुयान्नित्योतीर्थानुक्रमणंहरेः॥ गोवर्द्धनस्यमा
हात्म्यंगंगास्नानफलंलभेत्॥४७॥ इत्यादिवाराहपुराणेमथुरामाहात्म्येऽन्नकूट
परिक्रमस्त्रयोदशोऽध्यायः॥१३॥ श्रीवाराहउवाच॥ अतःपरंप्रवक्ष्यामितच्छृणु
ष्ववसुंधरे यथावृत्तंप्रतिष्ठानेदक्षिणापथमंडले १ सुशीलोनामवैशूद्रस्तुत
स्मिन्वसतिपत्तने धनधान्यसमृद्धस्तुबहुमित्रकुटुंबवान् २ कुटुंबभरणा
सक्तोनित्यकालंहितिष्ठति स्नानंदानंजपंहोमंदेवार्चनंकरोतिसः ३ क्र
यविक्रयशक्तस्यकालोदीर्घोगतस्तदा कदाचिदपिपापोसौसाधूनांसंगमे
गतः ४ नतेनधर्मश्रवणंकदाचिदपिसंश्रुतं देवानांब्राह्मणानांचभक्तिस्त
स्यनविद्यते ५ आत्मोदरनिमित्तंचपापंहिकुरुतेतदा गच्छंतंबहुकालंचन
सबुध्यतिपापकृत् ६ नतस्यजायतेबुद्धिर्दीनस्योपरिभामिनि नैवान्यमा
पिदातारंशक्नोतिचनिरीक्षितुं ७ धनयुक्तोपिपापोसौनददातिकदा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तस्यैवं वसतस्तत्र प्रतिष्ठाने पुरोत्तमे ८ स तु कालेन महता कुटुंबासक्तमान
सः स संत्यज्य प्रियान्प्राणान्प्रेतत्वं समुपागतः ९ मरुस्थल्यास्तु देशे तु वृक्षत्वम्
त्वं समाश्रितः प्रतीक्षन्तक्ष्य वसुधे तेन पापेन सर्वदा १० स तत्र वसते नित्यं ते
न पापेन गुंठित समाः सप्त गतास्तत्र वसमानस्य सुंदरि ११ तत्रैव दैवयोगेन म
हान्सार्थ उपागतः तस्य मध्ये तु वणिजो मधुरायां विनिःसृतः १२ गते स्यार्थे स
वणिग्वृक्षमूलमुपाश्रितः तत्रैव वसति प्रेतो रौद्ररूपो भयानकः १३ दीर्घदं
ष्ट्रः सुविकटो ह्रस्वबाहुर्विभीषणः महाहनुर्विशालाक्षो विडालसदृशाननः
१४ तं दृष्ट्वा स वणिक्श्रेष्ठः समुत्थाय जगाम ह गच्छंतं स समालोक्य प्रेतो वच
नमब्रवीत् १५ भक्ष्यभातो मम माद्य त्वं क्व भवान् गंतुमिच्छति प्रेतस्य वचनं श्रु
त्वा सोतिभीतो द्रुतं गतः १६ गच्छंतं तु गृहीत्वा तं प्रेतो वचनमब्रवीत् मम त्वं
विहितो भक्ष्यः स्वयं प्राप्तोसि मानुष १७ मांसं ते भक्षयिष्यामि पिबामि तव शो
णितं इत्याकर्ण्य वचस्तस्य स वणिग्वाक्यमब्रवीत् १८ कुटुंबभरणार्थाय सं
प्राप्तो दुर्गमाटवीं वृद्धः पिता मम गृहे माता पत्नी पतिव्रता १९ मयि संभव

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेरत्तः कुटुंबं हि मरिष्यति॥ विभोर्वचनमाकर्ण्य प्रेतो वचनमब्रवीत्॥ २०॥ कस्मा
त्स्थानात्समायातः सत्यं वद महामते॥ विभुरुवाच॥ गोवर्द्धनो गिरिवरो यमुना च
महानदी॥ २१॥ तयोर्मध्ये पुरी रम्या मथुरा लोकविश्रुता॥ तस्यां वसाम्यहं प्रेत पि
त्र्पैतामहे गृहे॥ २२॥ तत्रमेवसतो नष्टं यद्द्रव्यं पूर्वसंचितं॥ क्षीणवित्तस्ततश्चा
हमागतः पश्चिमां दिशं॥ २३॥ ततो मरुस्थलीं प्राप्य तव दृष्टिपथं गतः॥ यदत्रैव वि
चिंतं कार्यं कुरुष्व तदनंतरं॥ २४॥ प्रेतउवाच॥ न त्वां खादितुमिच्छामि कृपा मे जाय
ते त्वयि॥ समयेन हि मोक्ष्यामि कुरुष्व वचनं मम॥ २५॥ निवर्त्त गच्छ मथुरां मम का
र्यार्थसाधकः॥ तत्र गत्वा त्वया कार्यं यत्कर्त्तव्यं वदामि तत्॥ २६॥ स्नानं कृत्वा तु वि
श्रांतो कूपे चातुःसमुद्रिके॥ पिंडदानं कुरुष्व त्वं मम नाम्ना प्रयत्नतः॥ २७ स्नान
स्य च फलं देहि ततो गच्छ यथासुखं॥ प्रेतवाक्यं ततः श्रुत्वा विभुर्वचनमब्रवीत्॥
२८॥ नाहं यास्यामि मथुरां द्रव्याभावे कथंचन॥ मत्स्यस्य च शरीरं मे न ततस्तुष्टिमवा
प्स्यसि॥ २९॥ प्रेतउवाच॥ गृहे वद्धं धनं तेऽस्ति त्वं गच्छाशु निकृत्य च॥ अस्ति धनमप
र्यंतं गच्छ त्वं मा विलंवय॥ ३०॥ विभुरुवाच॥ गृहे मम धनं नास्ति यत्त्वया समुदीरि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तं गृहश्रेष्ठं मम धनं न चान्यत्तत्र विद्यते ॥३१॥ पितृपैतामही कीर्त्तिर् विक्रेया च सा
मया विभोर्वचनमाकर्ण्य तदा चैव वसुंधरे ॥३२॥ ततः प्रहस्य सुचिरं मित्रं वचन
मब्रवीत् अस्ति चैव धनं प्रोक्तं यन्मया त्वद्गृहे विभो ॥३३॥ सुवर्णभारं गर्त्तस्थं गृ
हे तिष्ठति संचितं निवर्त्त गच्छ संतुष्टः सुहृदां प्रीतिवर्द्धन ॥३४॥ एवं दत्त्वा मित्रे
मार्गमथुरायै नगम्यते ॥ सूत उवाच ॥ वणिग्भ्रष्टमना भूत्वा पुनर्वचनमब्रवीत्
३५ इमामवस्थां संप्राप्य कथं ज्ञानसमुद्भवः ततः स कथयामास यद्वृत्तं हि पु
रातनं ३६ प्रतिष्ठाने पुरवरे विष्णोरायतनं महत् प्रभातसमये तत्र विष्णोरायत
ने शुभे ३७ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र समागताः वाचकः पठते तत्र कथां
पौराणकीं शुभां ३८ मम मित्रं च तत्रैव नित्यकालं च तिष्ठति कस्मिन्काले तु मि
त्रेण नीतोहं विष्णुमंदिरं ३९ आसादरेण महता संतोष्य च पुनः पुनः तेनाहू
तो निवृत्तिस्तु मित्रपार्श्वे व्यवस्थितः ४० श्रुतं मया ततः पुण्यं कूपं तत्पापनाश
नं समुद्राः किल तिष्ठंति चत्वारोत्र समागताः ४१ तस्य कूपस्य माहात्म्यं श्रुतं
तत्र महाफलं वाचकायततो दानं दत्तं सर्वैर्महाजनैः ४२ मित्रेण प्रेरितो ३१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रानंमयामौनं समाश्रितं मित्रेणचपुनःप्रोक्तं यथाशक्त्याप्रदीयतां ४३
तदामित्रप्रसंगेनदत्तंवैस्वर्णमाषकं ततःकालेनमहतागतोवैवस्वतक्षये
४४ वैवस्वतनियोगेनततोहंपूर्वकर्मभिः॥प्रेतत्वमनुसंप्राप्तोदुस्तरंदुर्गमंम
हत् ४५ नदत्तंनहुतंचापिनतीर्थंचावगाहितं॥नतपितास्तुपितरस्ततोहंप्रे
ततांगतः ४६ इत्येतत्कथितंसर्वंयन्मांत्वंपरिपृच्छसि॥गच्छत्वंसंमुखस्तत्रय
त्रसामथुरापुरी ४७ प्रेतस्यवचनंश्रुत्वाविप्रमुर्वचनमब्रवीत्॥कथंधारयसे
प्राणानिमंवृत्तंसमाश्रितः ४८॥प्रेतउवाच॥कथितंहिमयापूर्वंयद्वृत्तंहिपु
रातनं वाचूकायतुयद्वृत्तंसुवर्णस्यतुमाषकं ४९ तद्दानस्यप्रभावेननित्य
तृप्तोस्मिवैविभो अकामेनमयादत्तंतस्यैदृक्कर्मणःफलं ५० प्रेतभावंगतस्या
पिनमेज्ञानस्यविभ्रमः ततःसर्वाणिजांश्रेष्ठ्नागत्यमथुरांपुरीं ५१ कृतंतेन
चतत्सर्वंयथाप्रेतेनभाषितं तेनकृत्येनप्रेतोसौमुक्तिंप्राप्यदिवंगतः ५२
एतत्तेकथितंभद्रेमाहात्म्यंमथुराश्रितं चतुःसामुद्रिकेकूपेपिंडदानेपरा
गतिः ५३ तीर्थेचैवगृहेवापिचत्वरेपथिचेवहि यत्रतत्रमृतादेविमुक्तिंयां

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

म०मा०
३२

तिनचान्यथा ५४ अन्यत्रहिकृतंपापंतीर्थेमासाद्यनश्यति तीर्थेयत्तुकृतंपापं
वज्रलेपोभविष्यति ५५ मथुरायांकृतंपापंतत्रैवचविनश्यति एषापुरीम
हापुण्यायस्यांपापंनवर्त्तते ५६ काश्यादिपुर्योयदिसंतिलोकेतासांतुमध्ये
मथुरैवधन्या याजन्ममौंजीव्रतमृत्युदाहैर्नृणांचतुर्धाविदधातिमुक्तिं ५७
कृतघ्नश्चसुरापश्चचौरभग्नव्रतस्तथा मथुरांप्राप्यमनुजोमुच्यतेसर्वकिल्
ल्बिषैः ५८ सूर्योदयेतमोनश्येद्यथावज्रभयान्नगाः तार्क्ष्यंदृष्ट्वायथासर्पोमे
घावातहताइव ५९ तत्त्वज्ञानाद्यथादुःखंसिंहंदृष्ट्वामृगाइव तथापापावि
नश्यंतिमथुरादर्शनात्क्षणात् ६० तिष्ठेद्युगसहस्रंतुपादेनैकेनयःपुमान्
तस्याधिकंभवेत्पुण्यंमथुरायांनिवासिनः ६१ परदाररतायेचयेनराश्चजितेंद्रि
याः मथुरावासिनःसर्वेतेदेवानरविग्रहाः ६२ बलिभिक्षाप्रदातारःसूनृ
ताःक्रोधवर्जिताः तीर्थस्नानरतायेचदेवास्तेनरमूर्त्तयः ६३ यदन्यत्रांस
हस्रेणब्राह्मणानांमहात्मनां एकेनपूजितेनस्यान्माथुरेणाखिलंहितत्
६४ अनन्यैर्माथुरोयस्तुचतुर्वेदस्तथापरः चतुर्वेदोपिनैवस्यान्माथुरेण

३२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भवंतिसर्वतीर्थानिपुण्यान्यायतनानिच मंगलानिचसर्वा
समःक्वचित् ६५ नार्यावर्त्तसमोदेशोनमथुरासदृशीपु
री यत्रतिष्ठंतिमाथुराः ६६ चतुर्वेदंपरित्यज्यमाथुरंपरि
नकेशवसमोदेवोनमाथुरसमोद्विजः ६७ मथुरावासिनोलोकास्तेपश्यं
पूजयेत् सिद्धभूतगणाःसर्वेयेचदेवगणाभुवि॥ अज्ञानास्तान्न
तिचतुर्भुजान् ६८ मथुरायांयेवसंतिविष्णुरूपाहितेखलु॥ इत्यादिवाराहपुराणेमथुरामाहात्म्येकूपप्र
पश्यंति॥पश्यंतिज्ञानचक्षुषः॥६९॥ धरण्युवाच॥ श्रुतानितुम
भावोनामब्राह्मणमाहात्म्यंचतुर्द्दशोध्यायः॥१४॥ श्री
हादेवतीर्थानिविविधानिच॥ असिकुंडेतिसंज्ञेयंतन्मेत्वंकथयप्रभो॥१॥
वाराहउवाच॥ सुमतिर्नामराजासीद्रविणोलोकविश्रुतः तीर्थयात्रानिमित्ते
नस्वर्गलोकंगतस्तदा २ गतेस्वर्गेतुसुमतौपुत्रोराज्यंचकारह विमतिर्नाम
नाम्नाचराज्येपैतामहेस्थितः ३ राज्यंचकुरुतस्तस्य आगतोनारदस्तदा
वरिष्ठंपाद्यमर्घ्यंचतस्मैदत्तंयथोचितं ४ प्रतिगृह्यचतत्सर्वंतमुवाचसत्
रहः पितुर्ऋणंत्वमपतांकृत्वासपुत्रोधर्मभाग्भवेत् ५ इत्युक्त्वानारदस्तस्यत

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

म॰मा॰
३३

नैवांतरधीयत नारदे तु गते राजा सप्रपच्छ स्वमंत्रिणः ६ तदा किमुक्तमृषिणा
नारदेन पितुः कृते आनयाम्यमितिय द्वाक्यं मया बुद्धं न किंचन ७ मंत्रिणश्च
ततो ज्ञात्वा पितुर्मरणमेवच तीर्थयात्रानिमित्तं च तस्मै राज्ञे न्यवेदयन् ८
अत एवोक्तमात्रेणानारदेन पितुस्तव श्रुत्वा राजा तदा वाक्यं तीर्थे कोपं चका
रह ॥ ९ विमतेर्बुद्धिरुत्पन्ना गच्छामो मथुरां पुरीं चतुरो वार्षिकान्मासान्मधुप
र्यां वसामहे १० सर्वाणि तत्र तीर्थानि तिष्ठंति विविधानि च आगते तु नृपे त
त्र तीर्थान्यूचुः परस्परं ११ युद्धं विमतिना साद्धं स्वयं कर्त्तुं न शक्नुमः कल्पग्रा
मं तु गच्छामो वाराहो यत्र तिष्ठति ॥१२॥ गतानि तत्र तीर्थानि कल्पग्रामं वसुंधरे
॥ तत्र वाराहरूपेण स्थितोहं च यदृच्छया ॥१३॥ यावन्निरीक्षयाम्यग्रे तावत्तिष्ठं
ति सन्निधौ ॥ तीर्थान्यूचुः ॥ जय विश्वेश जयाचिंत्य जय देव जयाच्युत १४ जय वि
श्वेश कर्त्तश्च जय देव नमोस्तु ते ॥ तीर्थैस्तु तोहं वसुधे वचनं चेदमब्रुवम् वरं वृ
णुत भद्रं वो यद्धो मनसि वर्त्तते ॥ तीर्थान्यूचुः ॥ वाराह यदि देवेश अभयं दातुम
र्हसि १६ विमतिना सुपापेन कृतं त्रासः सुदारुणः तन्निय च्छ स्वपापिष्ठं य ३३

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्विपश्रूपसिनः सुखं ॥ १७ ॥ श्रीवाराह उवाच ॥ हितायसर्वतीर्थानां हनिष्यामि म
हारिपुं ततस्तीर्थनियोगेन आगतोमथुरापुरी १८ तत्रागतेतुवसुधेयुद्धंकृ
त्वातुतेनवै तदासिन्नानुद्दिष्टोनसराजाबलदर्पितः १९ सूदितोहिमयादेवि
अस्यगंतुरिदितंमुवि अग्रेणतुमयोद्धृत्यमृत्तिकावरवर्णिनि २० तत्रकुंडंम
हादिव्यंदेवर्षिविधिनिर्मितं असिकुंडेतिसंज्ञाचप्राप्तातेनवसुंधरे २१ त
त्राश्चर्यंप्रवक्ष्यामिममकर्मसुखावहं पश्यंतिमनुजाःसिद्धाःसर्वपापविव
र्जिताः २२ चतुर्दृश्यांत्वमावास्याश्रद्धयातानितेद्विजाः फलानितत्रपश्यंति
लभंतेचसुनिश्चिताः २३ तस्मिन्कालेह्यहंदेविमथुरायांसमागतः तत्रा
तिष्ठाम्यहंभद्रेपश्चिमांदिशिमास्थितः २४ तथाकृत्वाचहेरण्यामूर्त्तयश्चच
तुर्विधाः तीर्थेवाराहसंज्ञेतुमथुरायांव्यवस्थितः २५ तासुदृष्टासुसुस्पृष्टा
सुसर्वपापैःप्रमुच्यते एकावाराहसंज्ञाचतथानारायणीपरं २६ वामना
चतृतीयाचचतुर्थीलांगलीशुभा एताश्चतस्त्रोयःपश्येत्स्नात्वाकुंडेसिसंज्ञके
२७ चतुःसागरपर्यंताक्रांतातेनधराध्रुवं तीर्थानांमथुराणांचसर्वेषांफल

CC-0. Arthur Avālon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मश्नुते २८ तीर्थैःसंस्थापितस्तत्रअसिकुंडस्ततोवरः यासांज्ञाकथितातत्र
कोटीवैदक्षिणोत्तरे २९ असिकुंडादितःकृत्वातीर्थकमलिकावरा सुस्नात्वि
तेपिद्वादश्यामसिकुंडेप्लुतोनरः ॥३०॥ मर्त्त्यःस्पर्शयेत्स्वधूपंबलस्त्वोपूजयेत्तया
॥ नास्येहपुनरावृत्तिर्भवेत्कालविपर्यये ॥३१॥ इत्यादिवाराहपुराणेमथुरामा
हात्म्येऽसिकुंडप्रभावोनामपंचदशोध्यायः ॥१५॥ श्रीवाराहउवाच ॥ शृणुदेविय
यासंज्ञाविश्रांतेकीर्त्तितापुरा ॥ राक्षसेनपुराप्रोक्ताब्राह्मणायमहात्मने ॥१॥
ऋषिरुवाच ॥ किमर्थंराक्षसेनोक्तासंज्ञाविश्रांतिसंज्ञिता ॥ किमर्थंदृष्टवा
न्विप्रःसर्वंकथयमेप्रभो ॥२॥ श्रीवाराहउवाच ॥ उज्जयिन्यामभूद्विप्रःसदाचा
रविवर्जितः नसपूजयतेदेवान्नसस्नाप्नन्नमस्यति ३ पुण्यांतिथिंसमासा
द्यनचस्नानंकरोतिसः वेदवेदाग्निरहितःपरदाररतःसदा ४ संध्येद्वेगा
यनस्थोसनित्यकालंचतिष्ठति नसदेवमनुष्यांश्चपितॄन्पूजयतेसदा ५
पापाचारोनेकृतिकःपापसंगीसुदुर्मतिः गार्हस्थ्यंधर्ममाश्रित्यमोहितोवर्त्त ३४
तेसदा ६ गार्हस्थ्यंसर्वधर्माणांश्रेष्ठमुक्तंस्वयंभुवा जीवंतिजंतवःसर्वेय

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avālon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यागासर्वतःस्थिताः ७ यथामातरमाश्रित्यसर्वेजीवंतिजंतवः एवंगृहस्थ
माश्रित्यसर्वेजीवंतिचाश्रमाः ८ गार्हस्थ्येवर्त्तमानोपिनस्वधर्मंसमाश्रये
त उभेसंध्येपरित्यज्यपापबुद्धिंसमाश्रितः ९ ततःसचौर्यतांप्राप्तःपापैःस
हसमागतः सचरात्रौद्रव्यंस्तोकंलब्ध्वासौराजरक्षिभिः १० पलायमानःस
तदांधकूपेपतत्तया मृतःसपतितस्तत्रराक्षसत्वमुपागतः ११ अंधकू
पेसपतितोघोररूपोभवत्तदा केनचिदर्थकार्येणमहान्सार्थउपागतः १२
तेषांमध्येद्विजःकश्चिद्भ्रांतीभूत्वावसुंधरे रक्षोघ्नेनचमंत्रेणसर्वंसार्थंचरक्ष
त १३ ॥राक्षसउवाच॥ अहंराक्षस्यामितेविप्रयत्नेमनसिवर्त्तते बहुकालेनसं
प्राप्तोभोजनंचयथेप्सितं १४ उत्तिष्ठविप्रगच्छत्वमन्यत्रशयनंकुरु येनाहंभ
क्षयेसार्थंयावत्त्वंनिर्भवेन्मम १५ राक्षसस्यवचःश्रुत्वाविप्रोवचनमब्रवीत्
एकसार्थप्रयातोहंनोत्सृज्यामिकथंचन॥१६॥ तस्माद्राक्षसगच्छत्वंसार्थंम
मपरिग्रहं निरीक्षितुंनशक्नोसिममंत्रबलेनच॥ १७ ॥राक्षसउवाच॥ ममम
मत्तेहतेविप्रदोषस्तवभविष्यति कृपांकुरुत्वंविप्रमेभोजनंममदीयतां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

॥१८॥ ततो सौ पृच्छते विप्रो राक्षसं दारुणं तदा॥ केन त्वं कर्मदोषेण राक्षसत्वमुपा-
गतः॥१९॥ ततः स कथयामास यद्वृत्तं हि पुरातनं॥ स्वाचारस्य स्वरूपं च राक्षसत्वं
यथागतः॥२०॥ विप्र उवाच॥ मित्र त्वेव वर्त्तसे रक्षो वद दास्यामि किं तव॥ आत्म
नश्चोपकाराय वद किं करवाणि ते॥२१॥ राक्षस उवाच॥ इच्छसि यदि मे विप्र य-
न्मे मनसि वर्त्तते॥ मथुरायां च यत्स्नानं कृतं विश्रान्तिसंज्ञके॥ तस्य स्नानफलं
देहि येन मुक्तिं व्रजाम्यहं॥ ब्राह्मण उवाच॥ कथं जानासि रक्षस्त्वं तीर्थं विश्रान्ति-
संज्ञकं॥२३॥ कथं च संज्ञातस्याभूत्तत्वं कथय राक्षस॥ राक्षस उवाच॥ उज्जयिनी
नामपुरी तस्यां वासो हि मे सदा २४ कस्मिंश्चिदथकाले तु गतोहं विष्णुमंदिरं
तस्याग्रे तिष्ठते विप्रो वाचको वेदपारगः २५ विश्रान्तितीर्थमाहात्म्यं श्रावये-
त्स दिने दिने तेन श्रवणमात्रेण मम भक्तिर्हि दृढस्थिता २६ मासैस्ताश्च श्रुता
तत्र विश्रान्तिश्च मयानघ वासुदेवो वसेन्नित्यं तस्मिन्स्थाने द्विजोत्तम २७
विश्रामं कुरुते येन तेन विश्रान्तिसंज्ञकं राक्षसस्य वचः श्रुत्वा विप्रो वचनमब्र-
वीत् २८ एकस्नानस्य हि फलं तव दत्तं च राक्षस इत्युक्तमात्रे वचने राक्षसो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मुक्तिमाप्नुयात् ॥ २५ ॥ इत्यादिवाराहपुराणे मथुरामाहात्म्ये विश्रांतिमाहात्म्यंषो
डशोध्यायः ॥ १६ ॥ धरण्युवाच ॥ मथुरांरक्षते कोसौ क्षेत्रपालः स्थितः सदा ॥ ते
न दृष्टेन यत्पुण्यं तन्मे कथय सांप्रतं विलं प्रोभो ॥ श्रीवाराहउवाच ॥ दृष्टभूतपतिं दे
वं वरदं पापनाशनं ॥ तेन दृष्टेन वसुधे माथुरं फलमाप्नुयात् २ पुरा वर्षसह
स्रं तु तपस्तप्तं सुदारुणं ॥ पूर्णे वर्षसहस्रे तु मया संभाषितो हरः ३ वरं वर
य भद्रं ते यत्ते मनसि वर्त्तते ॥ ईश्वरउवाच ॥ सर्वज्ञस्त्वं हि देवेश मया ज्ञातसु
निश्चितं ४ मथुरायां च मे स्थानं सदा देवेश दीयतां देवदेववचः श्रुत्वा
हरिर्वचनमब्रवीत् ५ मथुरायां च देवत्वं क्षेत्रपालो भविष्यसि त्वयि
दृष्टे महादेव मम क्षेत्रफलं लभेत् ६ अन्यथा नाशयेत्सिद्धिमेवमेतन्न
संशयः येन यद्या दृशं पुण्यं कृतं तीर्थे प्रयत्नतः ७ भजंते मनुजाः सि
द्धिमात्मभावेन तादृशीं मम क्षेत्रप्रभावेन भूमिः संसारछेदिनी ८ इंद्रस्ये
व पुरी रम्या यथा नाके मरावती जंबूद्वीपे तथोत्कृष्टा मथुरा मम वल्लभा ९
विंशति योजनानां हि माथुरं मम मंडलं पदे पदेश्वमेधीयं पुण्यं नात्र वि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्व

चारणा १० दिवौकसोपि कल्याणि नयधुजन्मभाजनं तपस्तो ष्ठंमहत्तैस्तुकृ
तंतैस्तुमहद्भुतं ११ तेभ्यश्चदत्तमहद्दानंयेममपुरनिवासिनः श्रद्धयाभक्ति
युक्तस्तुस्नात्वामधुपुरीनरः १२ ब्रह्महापिविमुच्येतकिंपुनस्त्वन्यपातकी
कृमिकीटपतंगाद्यामथुरायांमृताहिये १३ कूलस्थंतंतियेवृक्षास्तेपि
यांतिपरांगतिं आनुषंगेनगच्छंतिवाणिज्येनापिसेवया १४ मथुरास्नानमा
त्रेणपापंत्यक्त्वादिवंव्रजेत् मथुरांस्नातुकामस्यगच्छतस्तुपदेपदे १५ निरा
शीनिव्रजंतेचपापान्यस्यशरीरतः नमयाकथितंदेविब्रह्मणश्चमहात्मनः १
६ रुद्रस्यनमयापूर्वंकथितंचवसुंधरे मयासुगोपितंपूर्वंगुह्याद्गुह्यतरंप
रं १७ तत्रक्षेत्रेपुरीरम्यासर्वरत्नविभूषिता तस्यांतिष्ठंतितीर्थानितानिव
स्यामितच्छृणु १८ षष्टिकोटिसहस्राणिषष्टिकोटिशतानिच तीर्थसंख्या
निवसुधेमथुरायांमयोदितं १९ गोवर्द्धनंतथाक्रूरंद्वेकोटीदक्षिणोत्तरे प्र
स्कंदनंचभांडीरंकुरुक्षेत्रसमानिषट् २० पुण्यात्पुण्यतमंश्रेष्ठंतीर्थंविश्रां ३६
तिसंज्ञकं असिकुंडंसवैकुंठंकोटितीर्थोत्तमंस्मृतं २२ अविमुक्तंसोमती

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्थं यमनं तिं दुकं तया चक्रतीर्थं तथाक्रूरं द्वादशादित्यसंज्ञकं २२ एते पुण्या
:पवित्राश्च महापातकनाशनाः कुरुक्षेत्राच्छतगुणा मथुरायां न संशयः २३
ये पठंति महाभागाः शृण्वंति च समाहिताः मथुरायांस्तु माहात्म्यं ते यांति प
रमां गतिं ॥२४॥ कुलानि तेतारयंति हि शतं वंशयो र्द्वयोः ॥ एतन्मरणकाले तु यः
स्मरेत्प्रयतो नरः ॥२५॥ स गच्छेत्परमां सिद्धिमिह संसारच्छेदिनीं ॥ एतत्त्रे कथि
तं देवि सर्वपातकनाशनं ॥२६॥ तीर्थानां चैव माहात्म्यं किमन्यच्छ्रोतुमिच्छसि
॥इत्यादि वाराहपुराणे मथुरामाहात्म्ये तीर्थमाहात्म्यं नाम सप्तदशोध्यायः ॥१७
॥श्रीवाराह उवाच ॥ मथुरायाः परं क्षेत्रं त्रैलोक्ये न च विद्यते तस्यां वसाम्यहं
देवि मथुरायां च सर्वदा १ सर्वेषां देवि तीर्थानां माथुरं परमं महत् कृष्णेन
क्रीडितं यत्र तच्छुद्धं हि पदे पदे २ चक्रस्थितं हि तत्सर्वं कृष्णस्यैव पदे न तत्र
तत्र मध्ये च तत्स्थानं मंडूचं डूव्यवस्थितं ३ तत्रैव वासिनो लोका मुक्तिं यां
ति न संशयः दक्षिणे कोटिकृष्ण एव उत्तरे कोटिमध्यतः ४ तयोर्मध्ये स्थितो
देवश्चक्राकारः सोमवक्रतः तोदेवौ क्षेत्रपो ज्ञेयौ स्नानदानादिकर्म्मणि ५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तस्माद्धि स्मरणं कार्यं हि कोटीसर्वकर्मसु अर्द्धचंद्रे तु यः स्नानं करोति नियताश
नः ६ तेन वै चात्मया लोकाः प्राप्ताश्चैव न संशयः ॥ दक्षिणस्यां समासाद्य उत्त
रस्यां समापयेत ॥ ७ ॥ यज्ञोपवीतमार्गेण त्रायते च कुलान्बहून ॥ ऋषिरुवाच ॥
यज्ञोपवीतयात्रायां विधानं कथयस्व मे ८ यथा स्नानं हि कर्त्तव्यं तत्सर्वं श्रो
तुमर्हसि ॥ श्रीवाराह उवाच ॥ यज्ञोपवीतस्य विधिं शृणु त्वं वरवर्णिनि ९ मनुजो
येन विधिना मुक्तिं याति न संशयः गृहान्निःसृत्य मौनेन यावत्स्नानं समाचरेत
१० पूजां कृत्वा तु कृष्णस्य ततो ब्रूयाद्वसुंधरे अनेनैव विधानेन स्नानं कृत्वा तु म
त्परः ११ न तस्य पुनरावृत्तिरेवमेव न संशयः अनेन विधिना चैव उत्तरस्यां
समापयेत १२ पूजां कृत्वा वामनस्य ततो ब्रूयाद्वसुंधरे स्नाने समाप्ते विधि
वद्देवदेवस्य वै हरेः १३ कृष्णस्य कृत्वाचमनं स्नानादीनि यथाक्रमं गां वै पय
स्विनीं दत्वा हिरण्यं वस्त्रमेव च १४ ब्राह्मणान्भोजयेत्पश्चाद्विधिवद्रेव उदाहृ
तः तथा वामनकृष्णएवमेव तु कारयेत १५ न तस्य पुनरावृत्तिर्यमलोके
महीयते अर्द्धचंद्रे मृता देवि यमलोकं व्रजंति ते १६ अन्यत्रापि मृता ये

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तुभ्यईचंद्रेकृतक्रिया: तेपिस्वर्गंगमिष्यंति दाहादिकरणेयुता: १७ याव
दस्थीन्यईचंद्रेयस्यतिष्टंतिदेहिन: तावत्सपुण्यकर्त्ताचस्वर्गलोकेमहिय
ते १८ अईचंद्रेविमोक्षस्तितीर्थेविश्रांतिसंज्ञके दाहादिकरणेनत्रगर्ह
भोपिचतुर्भुज: १९ गर्तेश्वरेमृतेश्वरेह्यकोटीतुवसुंधरे मध्येसदैवतिष्ठा
मिनत्यजामिकदाचन २० मथुरावसथा:शांतास्तपोयुक्तामनीषिण: क
लिंदजाजलेस्नाताविप्रास्तेमामकीतनु: २१ विद्धिभागवतान्देविविश्रांतो
तुगतश्रमान् मथुरांवर्त्तमानायेमथुरास्नानतत्परा: २२ माथुराणांतुय
द्रूपंतद्रूपमेववसुंधरे माथुरेणतुतुष्टेनतुष्टोहंनात्रसंशय: २३ शृणुदे
वियथावृत्तंगरुडस्यमहात्मन मथुरायामागतोसौकृष्णदर्शनकांक्षया
॥२४॥ मथुरायांस्थितोदेविभिन्नरूपेनपश्यति तदागतोसौवसुधेदेवस्या
ग्रेविहंगम:॥२५॥ कृष्णस्यदर्शनार्थाय दिव्यंस्तोत्रमुदीरयत् ॥गरुडउवाच
॥विश्वरूपजयादित्यजयविष्णोजयाच्युत २६ जयकेशवईशानजयकृ
ष्णनमोस्तुते जयमूर्त्तजयामूर्त्तजयकेशिनिषूदन २७ जयकंसनिहंतस्त्वं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वासुदेव नमोस्तु ते॥ गरुडेन स्तुतो देवः स्वयमत्रैव तिष्ठति॥२८॥ गरुडस्य पुरस्त
त्रस्थितो दिव्यः शरीरवान्॥ वीक्ष्यमानो गरुडो वासुदेवेन सांत्वितः॥२९॥ किं कु
र्यां स्तोत्र संतुष्टो ब्रूहि सत्यं विहंगम॥ मथुरागमने किं ते एवमेव वदस्व मे॥३०॥
गरुड उवाच॥ मथुरामागतश्चाहं तव दर्शनकांक्षया आगतेन मया देव
दृष्टं नु तव रूपकं ३१ न हीदं तव देवेश माथुराणां तु रूपतः एकीभूतम
हं सर्वं पश्यामि लवतैरपि॥३२॥ श्रीकृष्ण उवाच॥ माथुराणां तु यद्रूपं तद्रूपं मे
विहंगम ये पापास्तेन पश्यंति मद्रूपान्माथुरान् द्विजान् ३३ एवमुक्त्वा ततः कृ
ष्णस्तत्रैवांतरधीयत गरुडोपि ततः स्थानाद्गतो देवि यथागतं ३४ इत्येत
त्कथितं देवि माथुराणां तु रूपकं येषां पूजनमात्रेण तुष्टोहं चैव सर्वदा ३५
मथुरायां मृता ये च मुक्तिं यांति न चान्यथा अपि कीटपतंगो वा तिर्यग्योनि
गतोपि वा ३६ यः पश्येत् पद्मनाभं तु द्वादश्यामाश्विनस्य तु एकदेहधरो दे
वौ शिवकेशवरूपिणौ ३७ एकादश्यां सोपवासः कृतशौचः समाहितः
कालिंद्यास्तु जले स्नातो मुच्यते योनिसंकटात् ३८ चैत्रस्य शुक्लद्वादश्यां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्नात्वातीर्थेतुवैस्मवे चित्तेविष्णुंसमभ्यर्च्यसोपवासश्चजागरेत् ३९ मथु
रायांगतःश्रेष्ठोनष्टोचनिकृत्ताकृतं एकादश्यांततोदेवियशोदांदेवकीत
था ४० महाविद्येश्वरीदेवीमुच्यतेब्रह्महत्यया योवाथांधर्मराजस्यमथु
रायास्तुपश्चिमे ४१ स्नानंकरोतितस्यांतुग्रहदोषैर्नलिप्यते यंयंदेवमभि
ध्यायेद्भक्तियुक्तेनचेतसा ४२ विश्रांतिसंज्ञिकंदृष्टादीर्घविष्णुंचकेशवं
सर्वेषांदर्शनंपुण्यमेभिर्दृष्टैःफलंलभेत् ४३ इतिजपतपहोमध्यानका
लेषुसम्यक्सततनमभिसमीस्यब्रह्मणायस्त्वयुक्तं॥सकलगुणगणानांमा
स्पदंब्रह्मसंज्ञंजननमरणहीनंविष्णुमेवाभियाति॥४४॥इत्यादिवाराहपुराणे
मथुरामाहात्म्येऽष्टादशोध्यायः॥१८॥श्रीवाराहउवाच॥पुनरन्यत्प्रवक्ष्यामित
च्छृणुष्ववसुंधरे मथुरायांपुरावृत्तंगोकर्णस्यमहात्मनः १ वसुकर्णःपिता
तस्यवैश्योधनसमृद्धिमान् तस्यभार्यासुशीलाचनाम्नागुणसमन्विता २
भर्त्तुप्रियकरीसाध्वीनप्रसूतावयोधिका देवतापूजनरतासंतानार्थेसुम
ध्यमा ३ नित्यकालंसुराचार्यांकालस्तस्यांव्यगछत तत्रैवगतपानामकू

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षिः परमधार्मिकः ४ सरस्वत्याः संगमे सोऽभूद्दामूलनिकेतनः मिताशीषह्
कालेतु सदा वसति सत्तमः ५ तस्यांतिके सुशीला च कृत्वा पादाभिवंदनं
उपोपविश्य करुणं कुरुतेऽतीव शोचनं ६ एवं विलपितं श्रुत्वा मुनेः सक
रुणं हृदि जाता तस्य कृपादृष्टिः संतानस्य विशद्हृदये ७ ध्यात्वा स सुचिरं का
लं विमृश्य वसुधे तदा उवाच मुनिशार्दूलस्तां स्त्रियं पुत्रगृध्निणीं ८ देवता
नां प्रसादेन तव पुत्रो भविष्यति शिवस्यायतनं दिव्यं गोकर्णेति च विश्रुतं
९ तमाराधय यदेवेशं यत्नात्परमकारणं स्नानदीपोपहारेण नित्यं च पतिना स
ह १० इत्युक्ता सा भगवता प्रणिपत्य प्रसाद्य च भर्तुः सा कथयामास यत्तेना
श्रु समीरितं ११ देवताराधनं प्रारब्धं चक्राते दंपती तदा सरस्वत्याः संगमे तौ
स्नात्वा गोकर्णमर्चनं १२ पुष्पदीपोपहारेण चक्राते तौ दिने दिने एवं तयो
र्द्वाब्दानि गतानि हुतं हेतवे १३ ततः प्रसन्नो भगवानुमापति उवाच ह
भविष्यति युवां पुत्र एकः सर्वगुणान्वितः १४ तस्य संततिसंदेहोऽदृष्टो मे वह्
धायतः देवतानां प्रसादेन पंडितस्य भविष्यति १५ इत्युक्तौ तौ प्रभातेन ३९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्नात्वासरस्वतीमनु प्रभाततस्यदेवायददौचान्नमर्थंचबहु १६ सहस्रभो
ज्यंमिष्टान्नैर्वस्त्रान्नवहुदक्षिणं ततस्तस्याःसुशीलायाःगर्भाधानमविंदत
१७ ततःप्रववृधेगर्भःशुक्लपक्षेशशीयथा सुषुवेदशमेमासिपुत्रंबाल
शशिप्रभं १८ गोसहस्रंततोदद्यात्सुवर्णंवस्त्रमेवच वहुधाःसर्ववर्णेभ्यः
पुत्रजन्ममहोत्सवे १९ जातकर्मतथाचैवनामकर्णतथैवच गोकर्णंनामत
स्यैवपिताचक्रेनिरूप्यच २० एवंचान्नप्राशनंचचूडोपनयनंतथा अतःप
रंचगोदानंवैवाहिकमतःपरं २१ दानंचददतस्तस्यदैवतंपूजयिष्यतः कृ
तानिवहुमुख्यानिमंगलानिवराननेने २२ ततःप्रविष्टेतारुण्येअप्रजंवीक्ष्यचा
परं पुनर्विवाहितामासभार्यातस्यचतुष्टयं २३ वयोरूपगुणोपेतास्तस्य
भार्याःसुलोचनाः अप्रजाएवताःसर्वानाभवत्पुत्रिणीक्वचित् २४ तेनैवध
र्मचारध्वंपूर्तंपारत्रिकंवहु वापीकूपतडागानिदेवतायतनानिच २५ प्रपा
मठाश्चनित्यान्नंभोजनंवर्तनानिच अनित्यतांततोमत्वाचंचलास्थिरजीवि
तं २६ विनियोगःकृतस्तेनसर्वदासर्वकर्मसु गोकर्णस्यसमीपेचपश्चि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मेचक्रपाणितः २७ प्रासादकारयामासपंचायतनकंहरेः आरामस्तत्रविस्तीर्ण
ःपुष्पजातस्तथैवच २८ आम्रजंबीरनारंगवीजपूरफलोपमाः प्राकारंकारया
मासपरिखामंडलीयकं २९ प्रावर्त्तकंचकूपेतुयेनासिंचतवाटिकां पुष्पानितु
विचिन्वंतिसर्वास्तावरयोषितः ३० स्नानपूजोपलेपांश्चमार्जनंदीपकमेच
कुर्वंतिदेवतागारेताःसर्वाःशुभलोचनाः ३१ परिव्रतामहाभागाश्चतस्रोम
गिनीर्यया नित्यकालंपतेर्वाक्येस्थिताःकुर्वंत्यहर्निशं ३२ मालाकारस्तया
नित्यंविटपानिप्रसिंचति पालयामासविधिवद्विधिदृष्टेनकर्मणा ३३ जात्यः
सुपुष्पवत्यश्चद्रुमाःफलसमन्विताः नित्यसत्रमपर्यंतंफलानांसुमहोत्सवं
३४ दीयतेभुज्यतेसर्वंयथासत्रंतथासदा एवंतुवसतस्तस्यमथुरायांस्थित
स्यच ३५ धनस्यसंक्षयोजातोद्रव्यस्यपितुरर्जितः शेषमात्रेधनेतस्यचिंता
मन्महतीतदा ३६ मातापित्रोःकुटुंवस्यभरणीयस्यभोजनं कथंतुहिक
रिष्यामिहाकष्टमितिसोब्रवीत् ३७ इतिनिश्चित्यमनसावणिग्लाभंस्थितं
हृदि कृत्वासार्थमुपामंत्र्यनिर्गतःपूर्वमंडलं ३८ तत्रक्रीत्वासुपण्यानिउ ४०

त्तरापथगानिच वहूनि[illegible]महामूल्यानिपरदेशागतानिच ३९ यातायातंततः कृ
त्वालाभालाभंततोवहु [illegible] क्रयाण्यंसुपण्यंचक्रीत्वाधाम्न्यवर्त्तत ४० उत्त
रापथदेशात्तुसार्थंसुवहुविस्तरं अश्वरत्नंमणिरत्नंपट्टरत्नंसमर्घकं ४१
शनैःशनैःसमागच्छन्मथुरायांगृहंप्रति एकदासार्थसंभारंविश्रांतुमुपच
क्रिरे ४२ सानौःपर्वतसामीप्येप्रभूतयवसोदके नद्यास्तीरेसुप्रदेशेन्त्रा
वासानिप्रचक्रिरे ४३ निवेश्यभांडंतत्रैवजंतूनांयवसादिकं समादिश्य
तिष्ठत्सुंचमनुष्यैःकतिपयैर्वृतः ४४ समारुरोहतंशैलंवहुकंदरशोभितं
क्रीडार्थंविहरंस्तत्रसोपश्यत्स्थानमुत्तमं ४५ प्रसन्नसलिलोपेतंनारंगाम्र
विभूषितं फलवंतिचवृक्षाणिपुष्पाणिसुरभीणिच ४६ पाषाणसंधौतत्र
स्यमावासंवनवासिनः तत्रारुह्यदरीद्वारंयावद्दृष्टिर्निपात्यते ४७ तावदभ्या
गतांवाचंवहुशःस्वागतेतिच श्रुत्वातंशब्दप्रभवंकिमेतदितिनिश्चयं ४८ क
रिष्यन्तत्रैवैकांतेदृष्टःपंजरगःशुकः आगच्छतोपविश्यतइदंपाद्यमियंवृ
षी ४९ फलानीमानिस्वादूनिमधुमांसोदकानिच यथेष्टंयावदिच्छाचना ८

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्त्रीतु परिचारिका: ५० आगतो पितरो मह्यं विशोषंतो करिष्यत: अतिथेराग
तस्येह पूजायां योवहिर्मुख: ५१ गृहस्थो वचनेनेतस्य पितरो नरकंगता: पूजि
ते पूजिता: स्वर्गे मोदंते कालमक्षयं ५२ आकांक्षितं गृहस्थो योनदद्यदतिथे
र्वै स मोतिथेर्दु:कृतं सर्वं गृहीत्वा नरकं व्रजेत् ५३ तस्मात्सर्वप्रयत्नेन पूज्यो वै
गृहमेधिना कालेप्राप्तस्त्वकालेवा यथाविष्णुस्तथैवस: ५४ एवंविधा:शुभा
वाचोवैश्योधर्मोपदेशका: श्रुत्वाशुकस्यसर्वस्योगोकर्णोमुदितोब्रवीत् ५५
कस्त्वं ऋषि:पुराणज्ञ: किंवादेवोथगुह्यक: तवप्रसन्नरूपस्ययस्येयंवागमा
नुषी ५६ कस्त्वंकथयमेसत्यमुत्साहोवातिथिप्रिय धन्य:समानुषोयस्यनि
त्यंसन्निहितोभवान् ५७ इत्युक्त:सशुक:सर्वं शशंसात्मपराकृतं शृणुरोदं
यथापूर्वंमयाकृतमबुद्धिना ५८ शुकस्यविप्रियंयादृग्हर्षैस्तपसिस्थि
तै: सुमेरोरुत्तरेपार्श्वेमहर्षिगणसेविते ५९ तपश्चकारविपुलंशुकोव्याससु
तोमहान् श्रोतुकामा:पुराणानिसेतिहासानिनैगमा: ६० ऋषयस्तत्रआज
ग्मुरसितोदेवलस्तथा मार्कंडेयोभरद्वाजोयवक्रीतस्त्रितोभृगु: ६१ अंगिरा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्तेभ्रिरीरेभ्यः कर्णोनामेधातिथिर्भृगुः सुतंतुस्तंतुरादित्यो वसुमानेकतो द्विताः
६२ वामदेवश्चाश्वशिरास्त्रिशीर्षो गौतमो दलः अन्येच सिद्धा देवाश्च गुरवः
काः पन्नगास्तथा ६३ शुकं संमानयामासुः पप्रच्छुर्हंसमं संविदं अहंतु वाम
देवस्य शिष्यो नाम्ना शुकोदरः ६४ धृष्टः श्रद्धान्वितो बाल्यान्मुनीनामग्रतश्च
रन् कुत्साद्योहकरं प्रश्नं वारंवारं तु पृष्टवान् ६५ अन्यायवादिनं मां च गुरुर्भि
स्तं निषेधति गुरूणामग्रतो वाक्यं कथायां कथितं तदा ६६ पूर्वपक्षाश्चसि
द्धांताः परस्परजिगीषया अंतरे चांतराक्षेपं पुनर्नैवमबोधयाः ६७ एवं निषे
धितश्चाहं गुरूणां मुनिसत्तमैः न हृतं यन्मया वाक्यं तेनाहं शापितस्तदा ६८
शुकेन कोपाच्छापं मे जल्पकोयं वटुः पटुः यया नाम्ना त्वयं पक्षी शुको भवतु
नान्यथा ६९ इत्युक्तमात्रे वचने तत्रैवाहं शुकोदरः शुकत्वं तत्क्षणाज्जातः स
मस्वेत्सचुरोजसा ७० मुनयस्तं महात्मानं शुकं तत्वार्थवित्तमं नान्यथाना
न्यथा वाक्ये कदाचित्त्वं भविष्यति ७१ आगामिकाले द्वास्यामि वरमस्मै शुका
यश्नो युष्माकमनुरोधेन यथारूपो विहंगमः ७२ अयं भविष्यति तदा सज्ञा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वहितभावितः पुराणतत्त्ववेत्ता च सर्वशास्त्रार्थपारगः ७३ मथुरायां मृतः पश्चा
द्ब्रह्मलोकं गमिष्यति एवं शापं वरं गृह्य तस्माद्दीनो ह्यहं द्रुतं ७४ मथुरामथु
रोच्चारं कुर्वन्नित्यमतं द्विजः नित्योडेनस्यमेगात्रे हिमाडेः कंदरे वसन् ७५
प्राप्तोऽहं शबरेणैव येनाहं पंजरे कृतः शबरस्तु सभार्यो वै क्रीडते समया सह
७६ मुनेः प्रसादात्मे ज्ञानं न जहाति कदाचन भमुज्यते ह्यवशेनैन कृतं येन
यथा च यत् ७७ स्वस्थो भव महाभाग मास्म शोके मनः कृथाः इत्युक्तः सन्
गोकर्णस्तदा तेन शुकेन च ७८ उवाच वचनं हृष्टं शुक मोक्षप्रदां शुके या
सा मुक्तिप्रदा रम्या मथुरा पापनाशिनी ७९ तस्यां वसाम्यहं भद्र वाणिज्यार्थ
मिहागतः पुनर्गच्छामहे तत्र भांडं गृह्य यथासुखं ८० मथुरावासिनं श्रुत्वा
गोकर्णे च शुकस्तदा हृष्टो बभूव मनसा पश्चीमोत्तसमीपगः ८१ पुत्रं सं
स्थाप्य चात्मानं गोकर्णस्य यथेप्सितं एवं च वदतस्तस्य शावरी शायनोत्थिता
८२ दयौ निःसृत्य वाह्ये तु सुदृशी सनसे स्थितं ८२ तौ परिवृत्तं चाहं दर्शनी
यं सुरूपकं ८३ निरीक्ष्य बहुशास्त्रज्ञ कोऽवचनमब्रवीत् प्रियातिथिं गृहा ४२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यातंमातः पूज्यतमंशुचिं ८४ कुरुपूजांयथार्हांच गोकर्णस्यवरातिथेः
शुकस्यवचनाद्यावत्पूजार्थमुपकल्पितं ८५ नेददानितितेस्तत्रवनाच्छ
बरश्चागतः तस्याग्रेतुपुनस्तेनशुकेनातिथिपूजनं शंसितंसर्वथेत्युक्त्वा
पूजांकृत्वाप्रणम्यच फलानिमांसयुक्तानिमधूनिरसवंतिच ८७ संपा
द्यसंविदंकृत्वावदर्किंकरवाणिते इत्युक्तःशबरेणाथगोकर्णोवाक्यमब्र
वीत् ८८ अन्यत्किंचिद्दयादेयंयदिकिंचिद्ददासिमे शुकायंपंजरस्था
श्चपुत्रार्थंमेप्रदीयतां ८९ मथुरायांगमिष्यामिकृतार्थःपितुरंतिके इत्यु
क्तमात्रेवचनेशबरोवाक्यमब्रवीत् ९० अस्माकंयमुनास्नानंसंगमेयमुना
भसः सरस्वत्याश्चपतनेदत्तेदास्यामितेशुकः ९१ शबरेणैवमुक्तोसौगो
कर्णःप्रत्यभाषत सरस्वत्याःसंगमेचयत्फलंलभतेनरः॥स्नानेनकिंफलंत
स्ययदिजानासितद्वद॥शबरउवाच॥शुकेनानेनमेसर्वंमथुरायाश्चयत्फ
लं तत्फलंसंगमस्योक्तंश्रवणद्वारशीव्रते वियोनिस्थोराक्षसोवातिर्य
ग्योनिगतोपिवा यस्यांदिग्रूपव्रतंकुर्यात्सगच्छेत्परमांगतिं संगमस्यफलं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तस्यहृष्ट्वागोकर्णमीश्वरं॥नासौयमपुरंयातिविष्णुलोकंसगच्छति॥एत
न्मयाश्रुतंतस्यसंगमस्यमहाफलं॥ ९६॥इत्यादिवाराहपुराणेमथुरामाहा
त्म्येगोकर्णसरस्वतीसंगमप्रभावोनामैकोनविंशतितमोध्यायः॥ १९॥श्रीवारा
हउवाच॥करिष्यामीतितत्सर्वंप्रपद्यप्रावरंतदा शुकंगृह्यततःस्थानात्स्व
स्थितोमथुरांपुरीं १ प्रविश्यपरगृहंकृत्स्नानिमातापित्रोस्तदर्पणं शुकस्यचरितंस
र्वंविनिवेद्यमहामतिः २ एवंनिवसतस्तस्यबहून्यब्दानितत्रवै सुखंगतानि
सर्वाणिविहारैर्देवपूजने ३ एवंनिवसतस्तस्यह्युद्योगमजायत पुनस्तत्रै
वगमनेवाणिज्यलाभेमतिर्गता ४ समुद्रजानिरत्नानिबहुमूल्यानिसाधुभिः
रत्नपारीक्षकैःसार्द्धमानयिष्येबहूनिच ५ एवंनिश्चित्यमनसामहासार्थ
पुरःसरः समुद्रयात्रिभिर्लोकैःसंविदंसूच्यनिर्गतः ६ पोतसंभारमाहा
रंकृत्वाकृत्यपदार्थकं शुकंगृहीत्वाप्रस्थानमकरोच्छुभवासरे ७ माता
पित्रोःशुभावाचोगृहीत्वादेवतागृहे भार्यायांदेवकार्येचवाटिकायाश्च
पोषणं ८ पितुःशुश्रूषणंचोक्त्वासर्वंयूयंकरिष्यथ यथायोग्यंयथाका

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लं यथा कृत्यं यथाचयत् ९ भवतीभिश्च कृत्यं मे करणीयं यथा तथा संदि
ष्टप भार्याः सुश्रोण्यो देवं दृष्ट्वा प्रसाद्य च १० भार्याभिः समनुज्ञातो यानपात्रं
गतस्त्वरा श्रकेन सह संप्राप्तो महांतं लवणार्णवं ११ पोतारूढास्ततः सर्वे
पोतवाहैरुपोहिताः अपारे दुस्तरेऽगाधे यांति वेगेन निस्पृहाः १२ अथ दैवव
शाद्वायुर्विलोमः समजायत दुर्वातेन तदात्यंतं बलात्स्रोत उपोहितः १३
पोतवाहास्ततः सर्वे विसंज्ञा मोहिताः कृताः हा कष्टं हि कथं किंचित्तु त्र गच्छा
महे वयं १४ तेषां तु वचनं श्रुत्वा तत्कालाद्दुर्वातपीडितं आक्षिपत्तवाभिरुग्रा
भिरन्योन्याघ्नं क्वमूर्च्छिताः १५ जल्पंति कोऽत्र पापिष्ठः समारूढो निराकृतिः
यस्य पातकसंस्पर्शान्मृताः सर्वे न संशयः १६ एवं विलपतां एषां चत्वारो
पि समभ्ययुः मासास्त्वैव वणिजां षण्मासैः सिध्यते फलं १७ निर्भर्त्सनं तत
स्तेषामन्योन्यं बहुजल्पतां यस्य पातकसंस्पर्शान्मज्जाः सर्वे महार्णवे १८
श्रुत्वा शकस्य गोकर्णः भृशं सात्म विनिंदनं अपुत्रस्य गतिर्नास्ति इति सर्व
स्य निश्चितं १९ एषां मध्येऽप्यहं पापस्तेन तप्याभि पुत्रक यदत्र युक्तं काले

स्मिनविषमेसमुपस्थिते॥२०॥वरस्त्वबुद्ध्याबाङुएपंकृच्छेत्वंकार्यवित्तम॥शुकउ
वाच॥माभूपितर्दुर्मानास्त्वमस्मिन्कालेयथोचितं अहंकरिष्येतत्सर्वंमाविषा
देमनःकृथाः एवमाश्वास्यपितरंसमुद्दीयततोद्भुतं २२ ध्रुवाख्यांदिशमुद्दी
श्यउत्तराभिमुखोययौ निजगत्यालंघयेद्देसुतरांदुस्तरंजलं २३ सानोःपर्व
तसामीप्येयोजनेनवरंगिरिं रोमांचिततनुर्यातःशुकोवीक्ष्यमहागिरिं २४
क्रमिलोईचयात्यगेतावद्देवालयंशुभं दृष्ट्वंचविस्मयापन्नेश्चद्रुस्फटिका
निर्मितं २५ सपंचाप्यतमरम्यंसरसाचोपशोभितं दिव्यनुसर्वाश्चर्टित्वेवंनि
लिम्पेदेवमंदिरे २६॥ कस्यायंकोत्रसंचारीकदाकिंनुपितामम वित्तरिष्यति
नोकालंदुस्कृतंसुकृतीयथा २७ क्षणमेकंतथाचैवतस्यचिंतान्वितस्यहि
सौवर्णपात्रहस्ताचदेवीदेवंसमर्चयत् २८ नमोनारायणायेत्यकानिषसा
स्वरासने निमिषांतरमात्रेणवयोरूपसमन्विताः २९ असंख्याताःसमाया
तायथादेवीतथैवताः गीतंवाद्यंचनृत्यंचयथासौख्यंविहृत्यच ३० गतास्ता ४४
देवताःसर्वायथास्थानमनुत्तमं देवतादक्षिणेभागेपक्षिणांचजटायुषां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

३१ तस्याप्यनेकयूथानि दृष्ट्वहंतिवहुसंघशः श्रकोलितासमस्तेषांमध्येदृ
ष्ट्वानुसंविदं ३२ तांभार्यांसपुरस्कृत्यपृच्छत्पारणंपारणं चयत् तेसमास्तास्ततं
प्राहुः कथयस्वयथागतः ३३ वारिराशौदुराधर्षेसमुद्रेरूपसंकुले तौमु
कः प्रसुवाचाथपितामेपोतसंस्थितः ३४ दुर्वातदुर्गमध्यस्थोविषमेसमु
पस्थिते॥तस्यत्राणसमीप्सन्वैत्रागतः प्रवरंगिरिं ३५ कुरुध्वंतस्यमेगात्रंय
यासुखमवाप्यते॥ पक्षिणऊचुः॥ एहिपुत्रसुखार्थंतेमार्गंदर्शयामहेशुभं ३६
पोताभ्यासगतिंयामः पितुस्तवगतिंप्रति ममैवपादविन्यासेक्रमयिष्येयतो
यतः ३७ तेनतेदृष्टतोमहांसपितासंतरिष्यति ममचंच्वावगाहेननेष्यंति
जलजंतवः ३८ एतत्पितुःसमस्तंहिशंसन्तिप्रनदीपतिं तारयामासवेगेनतग
त्वाघृष्टंजरायुषः ३९ सययौपर्वतंतीर्त्वा चिन्ताभिसमंजलं हृत्कंठंचैव
गंभीरंसुखेनसमुत्तीर्यथा ४० सोकांतरेततःसोथदेवागारमनुत्तमं सरो
वरंचपद्मान्यंमणिरत्नविभूषितं ४१ स्नात्वादेवान्पितॄंश्चैवतर्पयित्वाय
थासुखं पुष्पाण्यादायदेवंचपूजयित्वासकेशवं ४२ पंचायतनकंतत्रखचि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तंरत्नसंचयैः दृष्ट्वा निलिल्ये चैकांते गोकर्णस्यानुमते स्थितः ४३ त्तलोनताय
था पूर्वं देवताश्चागताः पुनः नत्वा चित्वा यथा योग्यं तासां ज्येष्ठाब्रवीदिदं ४४
स्वागतस्य तु धात्तेस्य धर्मिष्ठस्य महात्मनः भोजनार्थं फलं दिव्यं पानार्थं तो
यमुत्तमं ४५ गोकर्णाय प्रपद्ध्वं येन त्वं त्रिमासकी यथा शोकं यथा पा
पं यथा मोहः प्रणस्यति ४६ तत्तथा कृतमूचुस्तमभयं ते स्तु मा शुचः वसस्व
र्गोपमे स्थाने यावत्सिद्धिर्भवेत्तव ४७ गतास्ताः पुनरेवं च नित्यमेव दिने दि
ने वसते स सुखं तत्र मथुरायां यथा तथा ४८ पोतस्तस्मात्तु तत्तारसुवाते नो
पवाहितः रत्नाकरं गमे सातो भाविलाहे वणो गतः ४९ रत्नानि बहुमूल्यानि
न्याहृतानि बहूनि च यावत्पारीक्षणार्थं च गोकर्णो रक्तको विदं ५० निरीक्ष्य
तेस्य संत्रासो नदृष्ट्वा ग्रकुशुस्तदा कुत्रासो गतवान्भद्रो मृतो नष्टो जले प्लुतः ५१
व्रीडामुखो निमग्नाय निश्चितं मकरालये पितुरस्य वयं सर्वे पुत्रवद्धि चराम
हे ५२ भाग द्वयं च रत्नानामस्मै दास्यामहे वयं एष धर्मः सदास्माकमेका ४५
सार्थ गमनं हि ५३ एवं वसन्स गोकर्णो द्वीपस्थः पोकविह्वलः शुकं प्रेवा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चरीनाम्नामातापित्रोः कृतेतदा ५४ शुकेनमंत्रमुह्हित्वापितुरेवंनिवेदितं अहं
पक्षीलघुतनुर्भवंतंनेतुमक्षमः ५५ यातास्मिमथुरामार्गेसमुद्रेजलमालिनि
नि पित्रोर्वाक्यंतवाख्यास्येत्वदीयंचतयोस्तथा ५६ पोतारूढः प्रतिनिधिर्यो
स्यनुज्ञाप्रदीयतां सत्यमुक्तंततस्तेनगोकर्णेनतरंतदा ५७ गच्छत्वंपुत्रमथु
रांदृष्ट्वावस्थांचमामकीं त्वयाविनानशक्तोस्मिशीघ्रमागमनंकुरु ५८ इत्युक्तः
सतथेत्युक्त्वापोतारूढःखगोत्तमः कालेनमथुरांप्राप्तः सर्वंपित्रेन्यवेदयत् ५९
श्रुत्वातौविषमावस्थांमृतंहृदिनिवेश्यच रुदित्वासुचिरंकालंशुकेस्नाहोनिवे
शितः ६० अस्माकंजीवनार्थंहित्वयाकार्यंविहंगम कथाभिरनुकूलाभिहृ
र्मेदर्शिभिरेवच ६१ शुकेनपंजरस्थेनकथालोपेनविद्यया पुत्रशोकाभिसं
तप्तौतथैवास्तांसुदुःखितौ ६२ अथसार्थः समायातोरत्नपूर्णोयथोदधिः वसु
कर्णस्यपुत्रार्थमकरोत्सजनोमहान् ६३ सर्वेस्तैर्विप्रातिः संख्याचैकैकेनस
मुद्गैः रत्नैः समंचितोत्यर्थंपर्वतः कुसुमैर्यथा ६४ प्रसादंसर्वेसंपूज्यप्रेषि
तास्तेगृहंययुः एवंतेन्यवसंस्तत्रयत्तत्कालंसुखेनतु ६५ शुश्रूषमाणास्तंवे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

॥म॰ मा॰॥ पूपं यथा स्वपितरं तथा ॥ इत्यादिवाराहपुराणे प्राग्गितिहासे मथुरामाहात्म्ये गोकर्णप्र-
॥४६॥ भावोनाम विंशतितमोध्यायः ॥ २० ॥ श्रीवाराह उवाच ॥ गोकर्णस्तु तथा चक्रे तस्मिन्ना-
यतने शुभे प्रयमे क्रियया कृत्स्नं नित्यं वर्षत्रयोदश १ तादृश्योन्त्यगीतेषु कुश-
लाश्चागतानि शि सुरूपाश्च स्वलंकारा रमयंति दिने दिने २ गोकर्णं सर्वभावेन
गृहं विस्मरते यथा अथैकदा स गोकर्णस्ता दृश्यश्च हतौजसः ३ विवर्णवदनादीना
भग्नालंकारवाससः हीनांगालुंचितशिरः केशपक्षनखादयः ४ दृष्ट्वैव ते विकृ-
ताकाराः सव्रणा रुधिरस्रवाः तादृष्ट्वातीव दुःखार्त्तश्चक्रे मनसि वेदनां ५ अ-
पुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च मम संगादिमा दृष्ट्वोर दृष्टाश्च दृष्टामीगताः
६ एवं ज्ञात्वा स पप्रच्छ ताः सारूप्यविपर्ययं कथयध्वं महाभागाः किमेतद्रूप-
व्यत्ययं ॥ ७ ॥ देव्यूचुः ॥ अपृष्ट्वा त्वं महाभाग देवं सर्वेषु कारणं कालात्मकः स
भगवान्भुज्यते स्वकृतं यतः ८ सत्यं वै नित्यकालं च पृष्ट्वेतेनास्तदुत्तरं दुःखा-
र्त्तस्य सुदीनस्य नु जल्पंत्यति दुःखिताः ९ निश्चयार्थं पुनः सोथ गोकर्णस्ता ४६
ः प्रणम्य च पृच्छते ग्रहरूपेण निश्चयं विंदते तथा १० यदि गोप्यं मम आर्त्ते

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्यवैरूप्यंनकथिंचन अगाधेदुस्तरेप्राणानत्यक्ष्याम्यहमसुदुःखितः ११
एवमुक्तेतदातासांमध्येज्येष्ठाब्रवीदिदं दुःखंतस्यसमाख्येयंयोविनाश
यतेरुजं १२ शृणुवत्सवदिष्येहं विरूपकरणंयथा अस्माकंचसमुत्पन्न
मेकचित्तेनधारय १३ आस्तेमधुपुरीरम्यानराणांमुक्तिप्रदायिनी अयोध्
ध्याधिपतिर्वीरश्चतुरंगबलान्वितः १४ चातुर्मास्येतीर्थसेवीचागतोभक्ति
पूर्वकं तत्रदेवस्यचागारंविप्रैःपंचसमन्वितं १५ आरामवाटिकायुक्ता
वरप्राकारवेष्टिता कूपप्रावर्त्तकोपेतापुष्पजात्यावहूनिच १६ फलवं
तोद्रुमास्तत्रसर्वर्तुसुमनोहराः तस्याभ्यासेसाराजर्षिःआकारावासमुत्त
मं १७ सेवकैर्नाशितंसर्वमारामंसफलद्रुमं प्राकारंपरिखंचैवस्थंडिलप्रति
मेयथा १८ कृतनिर्वीर्यमारामंस्तैःपापवुद्धिसमाश्रितैः कीर्त्तयोयस्यताः
श्रेष्ठाःसोपिदैववशंगतः १९ पंजरस्थोयथासिंहःकोस्मान्त्रातामवेदिति
पिधायांजलिनावक्त्रमश्रुक्लिन्नस्तनांतरं २० रुरोदसस्वरादीनाहाक
ष्टमितिजल्पति सर्वासांरुदतीनांचकुररीणामिवस्वनः २१ श्रूयतेवहुधा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

म॰मा॰ ४७

कारं गोकर्णो हृद्विचिव्यथे एकैकस्यास्तु गोकर्णो मूर्द्धपादाभिवंदनं २२ प्रां
जलिर्दीनया वाचा सांत्वयामास तान् शनैः प्राप्तसंज्ञास्तु ताः सर्वा गोकर्णोऽप्याह
सुस्वनः २३ भविता यद्विज्ञाता हं राजानं तं निवारये किं करिष्यामि दैवेन स
मर्थोऽप्यवसीदति ॥२४॥ इत्युक्तमात्रे वचने ताः सर्वा लब्धचेतसः कस्त्वं कथय क
स्माच्च स्थानाद्यस्त्वमिहागतः ॥२५॥ गोकर्ण उवाच ॥ गोकर्णोऽहं सुचार्वंगपः पूर्वंदृ
ष्टासुलोचनाः इदानीं मलिनीभूता मम शोकविवर्द्धनाः २६ कथयध्वं ममा
त्मानं भग्नतस्तदनंतरं ततो ज्येष्ठा चाचचक्षे पुष्पजात्यस्खलं कृताः २७ वयमा
रामसंस्थाश्च स्वामिना परिपालिताः हृद्याः श्लिष्टाः पुष्पफलाः पुष्टाश्च द्विप
रंगताः २८ पूर्वं दृष्टाः सुरूपाश्च विपर्ययमतः शृणु राजलोकैर्भंजिताश्च
छेदनोन्मूलनेन च २९ पीडिता भृशमत्यर्थं तेनेदानीं सकल्मषा पुष्पमा
लाविहीनाश्च मूलस्कंधावशेषताः ३० एवंविधाश्च संभूता नष्टसंज्ञाः स्थिता
वयं यो देवस्तत्र पाषाणमस्ति के छिक यंत्रितः ३१ सोऽयसत्वमयः साक्षा ४७
त्तस्य पुण्यपरस्य कर्मणः कूपः स्वोदकपूर्णोऽयस्त्वत्रारामस्य सेचकः ३२ सरो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वरः सचैवात्रपूर्णिमात्रोऽस्तं तामसा येते वृक्षाः फलोपेतास्तेसुपर्णाः स्वगोत्त
माः ॥ ३३ ॥ रक्षां कुर्वंति सततं स्वामिनो मुत्र चेह च ॥ गोकर्ण उवाच ॥ आरामकर्त्तु
ः किंचात्र फलं भवति यादृशं ॥ करणात्कूपदेवानां तस्य पुण्यफलं वद ॥ ज्येष्ठो
वाच ॥ इष्टापूर्त्तौ द्विजातीनां प्रथमं धर्मसाधनं ३५ इष्टेन गम्यते स्वर्गं पूर्त्ते मो
क्षं विनिर्दिशेत् वापीकूपतडागानि देवतायतनानि च ३६ पतितान्युद्धरे
द्यस्तु स मूलफलमश्नुते भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः ३७
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोपणे ३७ अश्वत्थमेकं पिचुमंदमेकं
न्यग्रोधमेकं दश पुष्पजात्यः द्वे द्वे तथा दाडिममातुलिंगे पंचाम्रवापी नरकं
न पश्येत् ३८ यथा सुपुत्रः कुलमुद्धरेद्धि तथा पितृंस्तान्नरकप्रपन्नान् त
था प्ररोपाः फलपुष्पभूताः स्वं स्वामिनं नरकादुद्धरंति ३९ इंधनार्थं यद्दानी
तमग्निहोत्रं तदुच्यते छायाविश्रामपथिकैः पक्षिणां निलयेन च ४० प
त्रमूलत्वचा दीर्घ्वज्ञौषधार्थं तु देहिनां उपकुर्वंति वृक्षाश्च पंचयज्ञस्तदु
च्यते ४१ गृहकृत्यानि काष्ठानि ह्युद्रेजं तु गृहं तथा सत्त्वं निवर्त्तनं प्रोक्तं

मित्रापात्रैः समाकृताः ॥४२॥ फलंति वत्सरे मध्ये द्वौ वारौ शाकुनादयः सांव
त्सरं पितुर्मातुरुपकारं फलैः कृतं ॥४३॥ एवं पुत्र समारोपाः एवं न त्वं विदो वि
दुः ॥श्रीवाराहउवाच॥ एवमुक्तस्तया देव्या मालत्या पुष्पजातया ॥४४॥ हा कष्टं
कष्टमित्येनमुक्त्वा मोहं च पपात च ताभिराश्वासितो धीमान्स संज्ञो वारिणा स्थितः
४५ आत्मानं कथयास्माकं कस्माद्य त्वमिहागतः ॥गोकर्णउवाच॥ इष्टौ च मा
तापितरौ साध्वी भार्या चतुष्टयं ४६ मथुरायां ममैवैतदुद्यानं देवतागृहं य
दिन तत्र गतश्चाहं स पिता राजसन्निधौ ४७ इमामापदमापन्नान यूयं भव
तः कश्चित् ज्येष्ठाश्रोवाच नेष्यामि यदि ते रोचते नघ ४८ अद्यैव मथुरां दे
वीं प्रवेक्ष्यामो धिगम्यतां विमानप्रतिमाकारं यानमारुह्य सत्वरः ४९ दि
व्यानीमानि रत्नानि भूषणानि फलानि च गृह्णीष्वोपायनं राज्ञे तस्मै त्वं देहि
नर्घकं ५० आरुह्य स तथेत्युक्त्वा नमस्कृत्य हरिं च ताः उत्पपात ततः स्था
नाद्यत्र राजा व्यवस्थितः ५१ द्वाःस्थैर्निवेदयामास रत्नानि सुबहूनि च स्वर्ण
पात्रीकृता पूर्णा राजा वचनमब्रवीत् ५२ स्वागतं ते महाभाग परिपूज्य सु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मान्यच अर्द्धासनेकतःश्रीसारत्नदोधनदोयथा ५३ अस्मात्स्थानादिद
नीचमहाराजापसर्प्पितं आश्चर्यं दर्शयिष्यामिकथयिष्यामिवाविभो
५४ सतथेतिप्रतिश्रुत्यसेनापतिमुवाचह मुहूर्त्तमध्याच्चान्यत्रत्तयासै
न्यंप्रयातिमे ५५ क्षिप्रंतंप्रतिपद्यस्वनकालोत्यप्पगाद्यथा कृतेतेनत
दासर्वंयथाराज्ञाप्रभाषितं ५६ तादेव्योदिव्यरूपाश्चविमानकृतरूपकाः
साधुसध्वितिगोकर्णंप्रशशंसुःपुनःपुनः ५७ राजश्चांतःपुरंचैवप्रसदं
गोत्रनिःस्वनाः वरंदत्वायथाकामंस्वतीत्युक्त्वादिवंययुः ५८ गोकर्णस्तुतदा
चव्रेतत्सर्वंन्टपतेःसुखी साद्यंतमात्मचरितंपूर्वंधर्मस्ययत्फलं ५९ राजा
तस्मैप्रदत्तानिग्रामाणिचपुराणिच वस्त्राणिगजवाजीश्चयच्चान्यदपित
हुदु ६० आश्चर्यंपरमंधर्ममारामस्यमहाफलं॥ श्रुत्वासर्वंचकारैवंसार्व
भौमोमहीपतिः॥६१॥ इत्यादिवाराहपुराणेमथुरामाहात्म्येगोकर्णप्रभावोनाम
कविंशोध्यायः॥२१॥ श्रीवाराहउवाच॥ तत्रस्थितेनवचानाय्यगोकर्णःसार्थम
णलं श्वकंचमातापितरौसाध्वीभार्याचतुष्टयं २ लोकैस्तत्रमहोद्यानं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

म·मा· मथुरावासिभिः कृतं पूजनं विप्रराजस्य द्विजेभ्यो बहुदक्षिणं २ भक्ष्यं भोज्यं
४९ च दानं च दीनानाथजनस्य च गीतवादित्रमांगल्यं पुत्रहर्षोद्भवोचिते ३ तस्य
वं कृतवाँल्लोको गोकर्णस्य महात्मनः एकैकं च परिष्वज्य प्रणिपत्य यथाक्र
मं ४ मातामित्रोः प्रणम्याथ आशीरसापाद्वंदनं शुकं हृदि समारोप्य प्ररुरो
द जजल्प च ५ यस्य प्रसादाज्जीवं च धर्मश्चानुत्तमा गतिः विनष्टश्च पुनः
प्राप्तो राज्यलाभः सुपुष्कलः ६ शुकपुत्रान्मया प्राप्तमिह लोके परत्र च एवं
वसन्सुखी तत्र गोकर्णः सह बंधुभिः ७ रमयामास सुचिरं भुंजन्भोगपुरःस
रः शुकनाम्ना कृतं तेन शुकस्यायतनं महत् ८ शुकेश्वरं प्रतिष्ठाप्य दिव्यं
सत्रं चकार ह ब्राह्मणानां शतं द्वे च मिष्टान्नं वरभोजनं ९ शुकसत्रमिति ख्या
तं स्मृतो मुक्तिमवाप सः विमानवरमारुह्य स्वर्गलोकं गतः शुकः १० शुक
स्य दाने गोकर्णः फलं स्नानस्य संगमे श्राद्धं सुवर्णगोदानं कृत्वा तस्मै ददौ
च सः ११ प्रावरस्य सभार्यस्य तेन स्वर्गं गतस्य च शुकोदरेण विहितो विमान ४९
वरमास्थितः १२ एतच्चैव कथितं सर्वं मथुरायां महत्फलं सरस्वतीसंगमस्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गोकर्णस्य शिवस्य च ॥ २३ ॥ गोकर्णस्य तु संतानमक्षयं धर्मतो ऽव्ययं ॥ संभूतं समुखं
भुक्त्वा ततो मुक्तिमवाप्नुवान् ॥ २४ ॥ इत्यादिवाराहपुराणे मथुरामाहात्म्ये गोकर्ण
प्रभावो नाम द्वाविंशोध्यायः ॥ २२ ॥ श्रीवाराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि महा
पातकनाशनं संगमस्य प्रभावं हि पापिनामपि मुक्तिदं १ अत्रैव श्रूयते पूर्वं
ब्राह्मणः शंसितव्रतः महानामेति विख्यातः स्थितो सौ वनमाश्रितः २ स्वाध्याय
युक्तो होमे च नित्ययुक्तः सयोगवित् जपहोमपरो नित्यं स्वकाले क्षिपते च सः ३
एवं कर्माणि कुर्वन्स ब्रह्मलोकजिगीषया बहून्यब्दान्यतीतानि ब्राह्मणस्य व
ने तदा ४ तस्य बुद्धिरियं जाता तीर्थाभिगमनं प्रति पुण्यतीर्थजलैरेतत्क्षालया
मि कलेवरं ५ प्रयातो विधिवत्स्नात्वा तत्स्मर्यस्योदयनं प्रति असिकुंडादितः कृ
त्वा दक्षिणं कोटिमं ततः ६ तथा चोत्तरकोट्यं तं तत्र धान्यन्मायुरं च यत् क्रमे
ण सर्वतीर्थानि स्नात्वान्यान्यपि पुष्कलं ७ गत्वा सर्वाणि तीर्थानि स्नात्वाप्तो
मवाप्य हं इति कृत्वा मथुरायां निर्जगाम स वै द्विजः ८ कृतपूजा नमस्कारं
ध्यानं प्रतिपद्यत अध्वप्रपन्नो ददृशे पंच प्रेतान्सुभीषणान् ९ अरण्ये कंट

कृहृत्तेनिर्ज्जनेप्रान्तवर्ज्जिते नान्दृष्ट्वाविकृताकारान्घोराननतिभयानकान् १०
ईषदुन्नस्तहृदयोऽतिष्ठदुन्मील्यचेक्षुषी आलंब्यसततंधैर्यंत्रासमुत्सृज्य
दूरतः ११ पप्रच्छमधुरालापः केयूयंरौद्रमूर्त्तयः भवंतः कर्मणाकेनदुःकृते
नभयापहाः १२ एकस्थानात्समदायर्यंप्रस्थिताः कुत्रचासदा॥प्रेताऊचुः॥
क्षु[illegible]त्पिपासातुरानित्यंवहुदुःखसमन्विताः १३ हतवुद्ध्यावयंसर्वेनष्टज्ञा
नाविचेतसः॥नजानीमोदिशंकांचिद्विदिशांवापिचाध्वनि १४ नांतरिक्षंम
हींवापिजानीमोदिवसंतथा यदेतदुःखमापन्नंसुखोदर्कंफलंभवेत॥१५॥
अप्रकाशमिदंभातिभास्करोदयमेवच॥अहंपर्युषितोनामसूचीमुखमतः॥
परं॥१६॥शीघ्रगोरोधकश्चैवपंचमोलेखकस्तथा॥ब्राह्मणउवाच॥प्रेतानां
कर्मजातानांनाम्नांवैसंभवः कुतः॥१७॥किंतत्कारणमेतद्धियेनयूयंसनामका
ः॥प्रेताऊचुः॥ अहंस्वादुसदाश्नामिद्विजपर्युषितंद्विजे एतत्कारणमुद्दिष्टपा
नामपर्युषितंमम सूचिताबहवोनेनविप्राश्चान्योन्यमुत्तमाः १९ स्तवनाद्रि
सुरोद्वेगात्तेनसूचीमुखोह्ययं गृहेयाचकमायांतंज्ञात्वायःप्रपलायते २० ५०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रुतितीक्ष्व द्विजाग्र्यां श्च स्थानान्नोदककांक्षिणः एतत्कारणमुद्दिश्य सूचीमुख
मतोच्यते २१ संप्रार्थितो द्विजेनैव शीघ्रं याति यतो धमः एतत्कारणमुद्दिश्य
शीघ्रगस्तेन चोच्यते २२ एषग्रहस्य मध्येतु भुंक्ते द्विजभयेनच समारुध्यो
द्विगमनारोधकस्तेन चोच्यते २३ मौनेनापि स्थितो नित्यं याचितोपि लिखे
न्महीं अस्माकमपि पापिष्ठो लेखकस्तेन नामतः २४ मेढ्रेण लेखको याति
रोधकस्तु घटाकुशिराः शीघ्रगः पंगुतां प्राप्तः सूचीमुखमतः परं २५ उपि
तः केवलग्रीवो लंबोष्ठो बृहतोदरः ॥ ब्रह्महा ब्राह्मणप्रस्कागः पापादेवं प्रजायते
२६ एतत्ते सर्वमाख्यातमात्मवृत्तांतसंभवं ॥ यदि ते श्रवणे श्रद्धा पृच्छान्य
घृदिच्छसि ॥२७॥ ब्राह्मण उवाच ॥ ये जीवा भुवि तिष्ठंति सर्वे चाहारजीविनः यु
ष्माकमपि चाहारं श्रोतुमिच्छामि तत्वतः ॥२८॥ प्रेता ऊचुः ॥ शृणुष्वाहारमस्मा
कं सर्वभूतदयापर यं श्रुत्वा निंदसे नित्यं भूयो भूय निरत्यशः २९ श्लेष्ममूत्रपु
रीषेण योजितानि समंततः गृहाणि त्यक्तशौचानि प्रेता भुंजंति तत्रवै ३० व
लिमंत्रविहीनानि दानहीनानि यानि च गुरवो नैव पूज्यंते स्त्रीजितानि गृहाणि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

णि च ३१ यानि प्रकीर्णभांडानि प्रकीर्णोच्छेषणानि च नित्यं च कलहो यत्र प्रेता
भुंजंति तत्र वै ३२ अपात्रप्रतिदत्तानि विधिहीनानि यानि च निंदितानि हि
जातीनां जुगुप्सितकुलोद्भवे ३३ जातानां विहितानां च कर्म दुष्कृतकारिणां ते
भ्यो दत्तं तदस्माकमुपतिष्ठति पापिनां ३४ एतत्सापतरं चान्यद्भोजनं विद्धि कर्द
कं निर्विण्णाः प्रेतभावेन पृच्छामस्त्वां दृढव्रत ३५ यथा न भवति प्रेतस्तथा ब्रूहि
तपोधन ॥ ब्राह्मण उवाच ॥ एकरात्रत्रिरात्रेण कृच्छ्रचांद्रायणादिभिः व्रतैरभ्यु
द्धृतैः पूतो न प्रेतो जायते नरः ३६ मिष्टान्नपानदाता च सततं श्रद्धयान्वितः
यतीनां पूजको नित्यं न प्रेतो जायते नरः ३७ त्रिरग्निपंचचैकं वा प्रति नित्यं तु पो
षयेत सर्वभूतदयालुश्च न प्रेतो जायते नरः ३८ बहुमानापमानाभ्यां तुल्यः
कांचनलोष्ठयोः तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः ३९ देवतातिथिपू
जासु गुरुपूजासु नित्यशः रतो वै पितृपूजायां न प्रेतो जायते नरः ४० शुक्लागा
रसंयुक्ता च चतुर्थी जायते यदा श्रद्धावांश्श्राद्धकृन्मर्त्यो न प्रेतो जायते तदा
४१ जितक्रोधो ह्यमात्सर्यस्तृष्णासंगविवर्जितः क्षमावान्दानशीलश्च न प्रे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तोजायतेनरः॥४२॥एकादशींसितांकृष्णांसप्तमींचचतुर्द्दशीं॥उपवासतियो
नित्यंनसप्रेतोभिजायते॥४३॥गांब्राह्मणंचतीर्थानिपर्वतांश्चनदीस्तथा॥दे
वांश्चवंदतेनित्यंनप्रेतोजायतेहिसः॥४४॥प्रेताऊचुः॥एतच्छ्रुतमस्माभि
र्येनप्रेतोनजायते॥प्रेतस्तुजायतेकेनतद्वदत्वंमहामुने॥४५॥ब्राह्मणउ
वाच॥शूद्रान्नेनतुभुक्तेनब्राह्मणोम्रियतेयदि तेनैवत्दुदरस्थेनसप्रेतो
जायतेध्रुवं ४६ पांषंडाश्रमसंस्थश्चमद्यपःपारदारिकः वृथामांसर
तोनित्यंसचप्रेतोभिजायते ४७ देवस्वंब्राह्मणस्वंचगुरुद्रव्यंहरेत्तुयः
कन्यांददातिशुल्केनसचप्रेतोभिजायते ४८ मातरंपितरंभ्रातृन्भगिनीं
सुतमेवच अदुष्टान्सत्यजेद्यस्तुसप्रेतोजायतेनरः ४९ अयाज्ययाज
नाच्चैवयाज्यानांचविवर्ज्जनात् रतोवैशूद्रसेवायांसप्रेतोजायतेनरः ५०
ब्रह्महाचकृतघ्नश्चगोघातापंचपातकी भूमिकन्यापहर्त्ताचसप्रेतोजा
यतेनरः ५१ अग्न्याह्यंप्रतिग्रहीतिनास्तिकाभिःरतःसदा विरुद्धका
रीसततंसप्रेतोजायतेनरः॥५२॥प्रेताऊचुः॥यएतत्कर्मकुर्वंतिमूढाध

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

र्म्मपराङ्मुखाः विरुद्धकारिणः पापास्तेषां किंचिदुक्तिं वद ॥ ५३ ॥ ब्राह्मण उवाच ॥
ये धर्मविमुखा मूढाः दयादानविवर्जिताः तेषां गतिर्भवेदेका मथुरायां तु संग
मे ५४ श्रवणद्वादशीयोगे मासि भाद्रपदे सदा वामनं तत्र देवं तु पूजयेच्छ्रद्ध
यान्वया ५५ सुवर्णमन्नं वस्त्रं च छत्रोपानहसंयुतं तत्र स्नात्वा पितॄन् तर्प्य दत्वा
करकमेव च ५६ न ते तातेभविष्यंति मार्गगा न यमस्य ते ॥ विमानवरमारुह्य
विष्णुलोकं व्रजंति हि ५७ तत्र तीर्थे नरः स्नातो दृष्टः स्पृष्टोथवा श्रुतः ॥ ध्यातश्च
कीर्तितो वापि तेन गंगावगाहिता ५८ तीर्थस्यैव हि माहात्म्यं प्रेतो भूत्वाप्ररलो
तियः तस्मात्त्वय पदं विष्णोर्भवतीति मया श्रुतं ॥ ५९ ॥ प्रेता ऊचुः ॥ अस्माकं व
द कल्याण व्रतस्यास्य विधिं परं ॥ धर्मस्तेन यथा कार्यं प्रेतजान्मोक्षदायकं ६०
॥ ब्राह्मण उवाच ॥ एवमेव व्रतस्यास्य विधानं धर्मसंहितं पुराणं कथितं राज्ञे
मांधात्रे पृष्ठते पुरा ६१ वशिष्ठेन महाभागाः शृणुध्वं कथयाम्यहं प्रेतानां
मोक्षणं पुण्यं गतिप्रवरदायकं ६२ मासि भाद्रपदे शुक्ला द्वादशी श्रवणा
न्विता तस्यां दत्तं हुतं स्नानं सर्वं लक्षगुणं भवेत ६३ संगमे तु पुनः स्नात्वा पि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जयित्वा तु वामनं करकं विधिनाद्दत्वा तस्य पुण्यफलं शृणु ६४ कपिलानां
प्रातं दत्वा हिरण्यपापस्करान्वितं तेन यत्फलमाप्नोति तद्द्वादश्यामखंडितं ६५
रात्तसत्वं न गच्छेच्च श्रवणद्वादशीव्रतात् स्वर्गे च वसते तावद्यावदिंद्राश्चतुर्द
श ६६ ततः स्वर्गात्परिभ्रष्टो ब्राह्मणो वेदपारगः जातिस्मरो महायोगी मोक्ष
धर्मपरायणः ६७ ध्यानयोगानुभावेन युक्तो यात्यपुनर्भवं करकं च सुसंवी
तं पंचरत्नसमन्वितं ६८ यथालाभोपपन्नं स्यात्सौवर्णी वामनाकृतिः॥ उपा
नच्छत्रसंयुक्तो विधिमंत्रपुरःसरः॥ ६९॥ कृत्वा च विधिवत्तस्य स्नानपूजादिकं
नरः॥ मंत्रैस्तथाविधैर्होमे ब्राह्मणायोपपादयेत्॥ ७०॥ आगच्छ वरदानंत श्रीव
त्समदनुग्रहात्॥ सर्वगोपि निजां ध्रोनस्थानमेतद्दलं कुरु॥ ७१॥ आवाहनमंत्र॥
यत्तन्नक्षत्ररूपेण द्वादश्यां नभसि स्थितं॥ तन्नक्षत्रमहं वंदे मनोवांछितसिद्ध
ये॥ ७२॥ नक्षत्रमंत्र॥ नमः कमलनाभाय कमलालयकेशव॥ एकमूर्त्ते सर्वव्या
पिन्नारायण नमोस्तु ते॥ ७३॥ स्नाने॥ सर्वव्यापिन् जगद्योने नमः सर्वमयाच्युत॥
श्रवणद्वादशीयोग पूजां गृह्णीष्व केशव॥ ७४॥ पूजायां॥ धूपोयं देवदेवेशं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

खचक्रगदाधर॥ अच्युतानंत गोविंद वासुदेव नमोस्तुते॥७५॥धूपे॥तेजसा
तव लोकाश्च विहृताः संतु तेव्ययाः॥ त्वं हि सर्वगतस्तेजो जनार्दन नमोस्तुते॥७६॥ज
य गोविंद गोपाल गोपीवल्लभ वामन॥ केसारे देववंद्येवे मं ग्रहाणवरदीपकं॥७७॥
दीपे॥ अदितेर्गर्भमाधाय वैरोचनिप्रमाय च॥ त्रिभिः क्रमैर्जिता लोका वामना
य नमो नमः॥७८॥नैवेद्य॥ वेदानां संभवस्त्वं हि योगिनां परमा गतिः॥ जलशायिं
जगद्योगे अर्घ्यं मे प्रतिगृह्यतां॥७९॥ अर्घ्ये॥ हव्यगव्यस्य कर्त्ता त्वं होता हव्यं त्वमे
व च॥ सर्वमूर्त्ते जगद्योने नमस्ते केशवाय च स्वाहा॥८०॥ इति होमे॥ हिरण्मय मन्त्रं
त्वं देव जलवस्त्रमयो भवान्॥ उपानछत्रदानेन प्रीतो भव जनार्दन॥८१॥दक्षि
णायां॥ पर्जन्यो वरुणः सूर्यः सलिलं केशवः शिवः॥ अग्निर्यमो वैश्रवणः पापं
हरतु मे व्ययः॥८२॥ वामनस्तुतौ॥ अनंत प्रजापतिर्विष्णु रुद्र इंद्र चंद्र भास्कराः॥
अनल त्वष्टा यमो वह्नि पापं हरतु मे व्ययः॥८३॥ करकदाने॥ वामनो बुद्धिदाता
च द्रव्यस्थो वामनः स्वयं॥ वामनस्तारको द्वाभ्यां वामनाय नमो नमः॥८४॥यज
मानमंत्रः॥ वामनः प्रतिगृह्णामि वामनो मे प्रयच्छति वामनस्तारको द्वाभ्यां वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मनायदद्दाम्यहं ॥ ८५ ॥ द्विजप्रतिग्रहे ॥ कपिलांगेषु तिष्ठंति भुवनानि चतुर्दश ॥ द
त्वा कामदुघां लोका भवंति सफलान्नृणां ॥ ८६ ॥ गोदाने ॥ नमः पापच्छिदे तुभ्यं वेद
गर्भसुपूजित ॥ मया विसर्जितो देवस्थानमन्यद्गलं कुरु ॥ ८७ ॥ विसर्जने ॥ एवं वि
हं सु द्वादश्यां यो नरः श्रद्धयान्वितः ॥ यश्चैतत्त्रैनमस्येत त्कृत्वा फलमवाप्यते ॥ ८८ ॥
॥ ब्राह्मण उवाच ॥ यस्तु सारस्वते तीर्थे यमुनायास्तु संगमे करोति विधिनानेन
तस्य पुण्यं प्रश्नोत्तरं ८९ मयापि श्रद्धमाचैतत्कालं तीर्थस्य सेवनं दत्तसन्यास
रूपेण कृतं भक्त्या समन्वितं ९० तेन यूयं न शक्ता मे बाधितुं पापकर्मणः श्रवण
द्वादशी योगे तिथिरत्नसमन्विते ॥ ९१ ॥ तावद्भवंतु कर्त्तव्यं यावद्देकं त्वयं व्रजेत्
तीर्थस्यैव प्रभावो हि प्रत्यक्षमिह दृश्यते ॥ ९२ ॥ श्रवणाद्धोगतिं साक्षात्साधुल ९३
नामहेः धुना ॥ श्रीवाराह उवाच ॥ एवं ब्रुवति विप्रे तु आकाशाद्दुंदुभिस्वनः पुष्प
वृष्ट्या पतन्मो देवैर्मुक्ता सहस्रशः प्रेतानां तु विमानानि चागतानि समंततः
९४ देवदूत उवाचेदं प्रेतानां शृण्वतां तदा अस्य विप्रस्य संभाषात्पुण्यसंकी
र्त्तनेन च ९५ प्रेतभावविमुक्ताः स्थ तीर्थस्य श्रवणादपि तस्मात्सर्वप्रयत्नेन

सतीसंभाषणंवरं कर्त्तव्यंतीर्थभावेंचव्रतभावंचभामिनि ९६ तीर्थाभिषेकपु
रुषाद्यथातेषांदुरात्मनां प्रेतानामत्ययंस्वर्गंसरस्वत्याश्चसंगमात् ९७ प्राप्तं
तीर्थप्रभावाच्चश्रवणान्मुक्तिदंफलं तिलकंसर्वधर्माणांपंचप्रेतस्यमुक्तिदं
॥९८॥यःपठेत्परयाभक्त्याशृणुयाद्भक्तितत्परः॥करोतिश्रद्धयायुक्तोनप्रेतो
जायतेनरः॥९९॥पिशाचतीर्थनामाहिततःप्रभृतिजायते॥यस्यस्मरणमात्रेण
नप्रेतोजायतेनरः॥२०१॥इत्यादिवाराहपुराणेमथुरामाहात्म्येसरस्वतीसंगमप्र
भावोनामत्रयोविंशोध्यायः॥२३॥श्रीवाराहउवाच॥शृणुचान्यद्धरारोहेकृष्ण
गंगासमुद्भवं यमुनाश्रोतसिस्नात्वाकृष्णद्वैपायनोमुनिः १ ध्यात्वामनसि
गंगांत्वांकालिंदींपापहारिणीं नित्यकालंचकुरुतेतत्रतीर्थजलाप्लुतः २ सोम
वैकुंठयोर्मध्येकृष्णगंगेतिकथ्यते यत्रातप्यत्तपोव्यासोमथुरायांस्थितोमलः
३ तत्राश्रमपदंरम्यंमुनिप्रवरसेवितं आगच्छतिसदातत्रचातुर्मास्यमुपा
सितुं ४ संदेहोयस्यकस्यास्तिचेदस्मार्त्तेक्रियासुच पुराणोपनिषत्स्वादिय
स्ययस्यपरीक्षितं ५ तस्यतस्यचयोगीशःसंदेहंनाशयेत्प्रभुः कालंजरोम

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हादेवस्तस्यतीर्थपतिःशिवः ६ यस्यसंदर्शनाच्चैवकृत्स्नगंगाफलंलभेत् तत्र
स्थितोद्वादशाब्दंव्रतंसंगविवर्जितः ७ पत्राहारीचफलभुग्दर्भेवैपौर्णिमा
सिके कृत्वाहिमवतःपश्चाद्वद्दर्यामभितोगतः ८ व्यासचर्याचरस्तत्रध्यान
योगपरायणः त्रिकालदर्शीशुद्धात्मासिद्धत्वंप्राप्तवान्प्रभुः ९ तस्याश्रमप
दस्थस्ययद्दृष्टंज्ञानचक्षुषा मत्स्यत्वंकुब्जतीर्थेतुपांचालस्यसुमंतुना १० पां
चाल्योयद्द्विजःकश्चिन्नाम्नावसुरितिश्रुतः दुर्भिक्षपीडितोत्यर्थंसभार्योद
क्षिणांगतः ११ शिवनद्यादक्षिणेकूलेसुभिक्षेवरपत्तने निवासमकरोत्त
त्रब्राह्मणींवृत्तिमाश्रितः १२ तत्रस्थेनसुताःपंचकन्यायष्टीकलाविदा
जाताविवाहिताश्चैवधनधान्यसमन्विताः १३ सद्विजःकालमापन्नःसभा
र्यस्तत्रसंस्थितः कन्याचास्यानिसंगत्वमथुरामाजगामह १४ श्रुत्वापुरा
णोपठ्तामर्द्धचंद्रेस्थिपातनात् स्वर्गेवसतिसोनित्यंयावदाहूतसंप्लवं १५
तीर्थयात्राप्रसंगेनलोकःप्रचलितोबहुः तेनसार्थेनसाकन्यामथुरामाजगा
मह १६ कनिष्ठाभगिनीतेषांविधवाबालभावके सुरूपासुकुमारांगीनी

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लकुंचितमूर्द्धजा १७ कदलीकांडसंकाशेतस्याऊरूसमांसले सुश्लिष्टांगुलि
पादोचनखाभ्यातामस्रमुज्वलाः १८ गंभीरादक्षिणावर्त्तनाभिस्त्रिवलिशोभि
ता क्षामोदरीसमकुचा पीनोन्नतपयोधरा १९ कंबुग्रीवासंवृतास्यासुदंती
स्वधराहनुः सुनखीःस्वक्षिणीसुभ्रूःसुप्रमानासुभाषिणी २० तेनतेनैवसं
पूर्णारूपेणैवतिलोत्तमा यंयंपश्यतिचार्वंगीयुवानंचप्रभावते २१ ससचि
त्रइवन्यस्तोविचेताजायतेनरः एवंविधातत्रतत्रतीर्थस्नानपरायया २२
दृष्टावेश्यासमूहेनप्रगल्भेनतदाक्वचित् कन्याकुब्जाधिपोराजा तत्रधर्मे
तिविश्रुतः २३ तस्यसत्रंसर्वकालंदेवेगर्त्तेश्वरेशिवे प्रवर्त्ततेसुवित्ताढ्यंप्रे
त्तणंचमनोहरं २४ वादित्राणिचगीतानिनृत्यकस्यसदनेयथा तस्यदेवस्य
तावेश्यालाभिःसाप्रतिलोभिता २५ गीतनृत्यगृहेष्वेवंतासांधर्ममुपेयुषी
गतालयैर्दिवसैःसाध्वीजसाध्वीनांपदंशनैः २६ एवंवसतिसाबालादेव
स्यागेपरिग्रहे यथासुखंसमंताभिर्विहरंतीदिनेदिने ॥२७॥ इत्यादिवाराह
पुराणेमथुरामाहात्म्यकृस्नांगाप्रभावोनामचतुर्विंशोध्यायः॥२४॥ श्रीवा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रोहउवाच॥ पंचानांतु कनिष्ठोयः पांचाल्यो ब्राह्मणात्मजः वाणिज्यभांडमादा
यसमुद्रस्य प्रसंगतः १ सार्थस्य नितः स्फीतो भाति घनवान्रूपवांस्ततः क्रमे
णतेसर्वदेशान्विषयान्पर्वतान्नदीः २ आक्रम्य तत्र संप्राप्तो यत्र सा मथु
रापुरी आवासं कारयामासुः प्रभूतयवसेंधने ३ स्थाने तस्मीति कृत्स्नानि
प्राप्तानि पुरुषाणि च स्थाप्य तत्र प्रसंगेन वस्त्राभरणभूषितः ४ ऐश्वर्य
मदभावेन यातेन महता तदा स्नानं दानं ततः कृत्वा देवतानां च दर्पणे ५
कौतुकार्थे ततो देवं गतो गर्त्तेश्वरं तदा तिलोत्तमायास्तद्रूपं दृष्ट्वा मोहवशं
गतः ६ धात्रेयिकायास्तस्याश्च बहुमानपुरःसरं वस्त्राणि बहुरूपाणि
कटकानि सनूपुरैः ७ रत्नाहाराणि भूषणानि तस्या लोभाय मुद्यतः प्रद
दौ चंदनं सारं कर्पूरमगुरुं तथा ८ तस्य गृहे वरे तत्र वसते च दिने दिने प्रहर
द्वे दिने याते ततः स्वगृहं ययौ ९ स्नात्वा समापतीर्थे तु हंसंगोगोष्ठ वेतदा
एवं नित्यप्रसक्तो हि कुरुते [illegible] गर्वितः १० षण्मासा वर्त्तते कालो युयेक
दिवसं तया अथैकदा समायातो स्नातुं तत्र सुमंतुना ११ आश्रमस्य नद

म २

श्चातितस्यगात्रेशुचीनिच कृमयोरोमकूपेभ्यः पतमानास्त्वनेकशः १२ यावत्स्ना
नेसकुरुतेतावत्तेराशिमात्रकाः स्नातस्यतस्य[illegible]नश्यंतिसुरूपश्चापिजा
यते १३ एवंसुमंतुनानित्यंभवेद्रूपव्यवस्थया सप्तभिःस्नानपूर्वंतुपश्चा
त्सोमलगात्रकः ॥१४॥ आश्चर्यंपतत्समालक्ष्य कोयंकिंवेषतर्कयत् इतिवि
स्मितस्तदापृष्टः कस्त्वंकस्मात्समागतः ॥१५॥ किंकरोषिदिवारात्रौब्रूहित्वंपृष्ट
तोमम ॥पांचालउवाच॥ पांचालोब्राह्मणसुतोवणिग्लाभार्थमागतः ॥१६॥
दक्षिणापथिदेशाच्चमथुरांप्रविरात्स्वकात् निष्क्रामुषित्वातीर्थेचस्नात्वादृ
ष्टामहेश्वरं १७ कालंजरंभवस्थानगच्छामिश्रियविंततः ॥सुमंतउवाच॥
आश्चर्यंपतवदेहेस्मिन्नित्यंपश्यामिनिःस्रतं अस्नातेकृमिसंपूर्णंस्नातेनि
र्मलवर्चसं अस्तिकिंचिन्महापापंतवप्रच्छन्नसंभवं १९ अस्यतीर्थप्रभावे
नस्नानाद्रुत्थितिदूरतः कालंजरस्यसंस्पर्शाच्छुद्धदेहश्चदृश्यते २० निरू
प्यकथयास्माकंयत्तेप्रच्छन्नकिल्बिषं तीर्थमाहात्म्यभावेनतेनदृष्टामिते ५६
मलं २१ इतितस्यवचःश्रुत्वामुनेस्त्रैलोक्यदर्शिनः नस्यांराश्चांसएकांतेत

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

याचसहितागृहे २२ पृच्छते काकुतः कस्य कथं त्वमिह वत्स्यसि एवं पृष्टास्त
कां चेष्टां मातापित्रोः समुद्भवां २३ आत्मनश्चागमनं च शनैः प्रोवाच मामि
नी पांचालनगरी रम्या गंगाया दक्षिणे तटे २४ तस्यां पिता च माता च वस
ते स्म पुरोत्तमे दुर्भिक्षपीडितेरा पुत्रैर्गतौ दक्षिणापथं २५ नर्मदादक्षिणे
कूले ब्राह्मणानां पुरोत्तमे तत्रस्थस्य पितुर्मेह्यं पंच पुत्रा मया सह २६ जाता
स्तेषामहं षष्ठी कनिष्ठा विधवाभवत् यो सौ कनिष्ठको भ्राता मम ज्येष्ठस्य पं
चमः २७ बाल एव गतो देशं धनत्स्थाप्रलोभितः याते तस्मिन्पिता माता
मृतौ तमनदीमनु २८ तीर्थे स्मिन्नर्थपाताय्ये महंसा ये समागता अत्र
स्नानपरा नित्यं देवब्राह्मणवंदनं २९ कुर्वती वधमापन्ना आसां यस्या मम
दृशं वर्तते कुलटाधर्मे पुंश्चलीनां विहीनकं ३० द्वयोस्तु कुलयोर्वै पूर्वाए
कविंशतिसंख्यया नीता नरकमत्युग्रं मया पापिष्टया भृशं ३१ एवं सात
प्यतस्मै च कथयित्वा तिलोत्तमा रुरोद सस्वरं दीना स्मृत्वा सर्वं कुलेवरं ३२
विलप्य बहुधा रात्रौ ततस्तां स्त्रीजनो महान् तत्रागत्य प्रसांत्वेति किं मद्दे कार

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एंवद ३३ एवंश्रुत्वासपांचालीमुमोहचममारच सांत्वयित्वातुतांमद्रानाः
स्त्रियोरुदन्तीत[illegible]तः ३४ पांचालंपरिवार्य्यैवंगतप्राणंयथातथा गात्रम
र्द्दनसस्निहमोयच्छेमेंतिमंत्रकं ३५ सर्वेतस्यप्रयुक्तंयत्तामिस्तत्रोपकल्पितं
तस्यकष्टेनकायेचततोजीवमथाचलत् ३६ वायुर्यःप्राणसंचारीप्राणि
नांजीवसंज्ञकः लब्धप्राणांपुनैस्तंतुराविशेषेणचेतनं ३७ स्वस्थावस्थांतु
तंमत्वापप्रच्छमोहकारणं ततस्तेनयथामानंकुलस्यचरितंमहत् ३८ तिलो
त्तमासहायानांस्त्रीणांमम्मेसविस्तरं अगम्यागमनंकृत्वाप्रायश्चित्तंमनोर
धे ३९ ब्रह्महाचसुरापीचब्राह्मणोयद्विनायते प्रायश्चित्तंविनिर्दिष्टंमुनि
भिर्जीवसंशयं ४० मातरंगुरुपत्नीचस्वसारंपुत्रिकांवधूं गत्वातुप्रविशेद
ग्निंनान्याशुद्धिर्विधीयते ४१ ब्रह्मघ्नश्चसुरापश्चस्त्रीघ्नश्चगुरुतल्पगः अ
गम्यागमनंकृत्वाएतांसमतामियात् ४२ इतिश्रुत्वातुपांचालीजेष्टभ्रात
रमेवतत् द्विजेभ्यःप्रददौसर्वमंगलेगनंविभूषणं ४३ रत्नंवस्त्रंधनंधान्यं
यत्किंचित्तस्यविस्तरं धौयंकालंजरस्यार्थंप्रविष्टामिइताशनं ४४ इतिनि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

श्रित्यतत्रैव स्नात्वा देवं प्रणम्य च सुमंतुमुनिमत्युग्रमभिवंद्योपविश्य च ४५
मरुस्थं तत्र कृत्वा सर्वं यतव्रतो उद्घुष्टो नगरे तत्र सहसा जनरावकः ४६
पंचाले मे ततेनैव माथुरेभ्यः सहस्रशः दत्तानि सर्वदानानि क्रीत्वा ग्रामं च
येन च ४७ इत्थं वा स्वं जपं दिव्यं जापकेभ्यः प्रदत्तवान् सहायेभ्यस्तथा भागं द
वसत्वार्थमेव च ४८ ऊर्ध्वं दैहिकमागार्थं परिकल्प्य यथाविधि स्नात्वा तीर्थे तु
कृत्स्नस्य देवं दृष्ट्वा प्रणम्य च ४९ पूजार्थं धनमेवाथ कालंजरकृते ददौ सत्रं
मठं च सर्वं च कृत्वा संदिश्य साधिकान् ५० सुमंतुप्रवरस्याथ पादे जग्राह ध
र्मवित् दिव्यज्ञानं च तेश्रेष्ठ मद्भुतं रोमहर्षणं ५१ आगम्यागमनात्पापमाग
तं मम मुद्गत स्वस्वाकनिष्ठया सो ई यावदागमनं मम ५२ अत्र स्थितस्य दा
नीच नित्यैकाल कृतं मया त्वयानिर्मलहृष्ट्वा च मन्त्रेभ्यो निपूंसदा ५३ दृ
मयः पतमानाश्च स्नानात्सर्वं यथोचितं तत्सत्यमद्य संजातं तेनातिगामिपा
तकं ५४ एवं विश्राम्य तत्पापं विनाशीय धूतो हितो प्रविष्टकामं तु नागे तो
रवचो वाचापारीरिणी ५५ मैनाकाद्रीः साहस्रं च विपाप्मानौ यतस्मरं कथं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पानकसंज्ञासान्मरणोक्तनिश्चयो ५६ यत्र कृष्णेन संचारं क्रीडिता च यथासु
खं चक्रांकितपदस्थानेन स्थानेत्र तमसेश्रुभे ५७ अन्यत्र हि कृतं पापं तीर्थमा
साद्य गच्छेति तीर्थेतु यत्कृतं पापं वज्रलेपो भविष्यति ५८ ह्यावेतो च यथा
वश्यंप गंगासागरसंगमे सकृद्देव नरः स्नात्वा मुच्यते ब्रह्महत्यया ५९ हृषि
आयानि तीर्थानि सर्वाण्यपवाभिषेचनात् तत्संचतीर्थस्नानेन समं नास्त्यत्र
संशयः ६० एकादश्यां च विश्रांतो द्वादश्यां पोकरे तथा त्रयोदश्यां नैमिषे
च प्रयागे च चतुर्दशी ६१ कार्तिक्यां पुष्करे चैव मघायां चैव सितासिते का
लेष्वेषु नरः स्नात्वा सर्वं पापं व्यपोहति ६२ मथुरायां पंचतीर्थेभ्यो विश्रांतो
चक्रसंज्ञके सरस्वत्यामसिकुंडे तथा कालंजरस्य च ६३ पंचतीर्थाभिषे
कात्तु यत्फलं लभते नरः कृष्णगंगादशागुणं लभतेतु दिने दिने ६४ ज्ञान
तो ज्ञानतो वापि यत्पापं समुपार्जितं सुकृतं दुष्कृतं वापि मथुरायां प्रणश्यति
६५ वाराहेण पुरा चैव पृथिव्या परिपृच्छते तीर्थानां गुणमाहात्म्यं कथि ५८
तं पापनाशनं ६६ सर्वदेवमयो यो सौ सर्वयज्ञमयस्तथा अनंतस्यापि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मेयश्चयस्यचान्तोनविद्यते ६७ यस्यश्रोत्रेकर्णेघोतुश्चाकाकोलिश्चमा
त्रकः विलीनोनैवज्ञायेततस्यदेवस्यकाकथा ६८ तयानयनयोःप्रांते
तेजोलीनंनदृश्यते निःश्वासेननिर्दृष्टोसौवायुर्नेष्टोनदृश्यते ६९ खुरां
तरांगुलिप्रांतेसुमुद्राःसप्तलीनकाः दृश्यन्तेस्वरसंकाशाःसाद्रिरूपामुखांत
रे ७० रोमकूपांतरेमग्नाःसशैलवनकानना नष्टाद्दृश्यीनलभ्यंतेतस्यदेव
स्यकोधिकः ७१ सोत्रतीर्थपरित्राणंकुर्वन्देवोविधित्सया वाराहःसंस्थि
तःप्राज्ञःपुराणेयेनसूचितं ७२ पृथिव्याःसर्वसंदेहान्स्फोटयामाससोव्य
यः तस्यसंदर्शनादेवसर्वपापविवर्जितः ७३ तल्लोणादेवजायेतनात्रका
र्याविचारणा ज्येष्ठस्यशुक्लनवमीस्नात्वागांगोदकेनरः ७४ शूकरस्यत्रि
रात्रंतुयःकुर्याद्दीपसंयुतं द्वादश्यांशुक्लगंगायांस्नात्वाकालंजरंततः ७५
त्रिरात्रंशूकरेकृत्वादत्वादानंचशक्तितः कालंजरेचद्वादश्यांनसपापैर्विलि
प्यते ७६ द्वादशादित्यसंकाशोविमानेनसमास्थितः॥ब्राह्मणासमनुज्ञातो
विष्णुलोकेमहीयते ७७ ॥श्रीवाराहउवाच॥ एवंचसुस्वरेतीवरवेस्थितेःसंप्रबोधि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तः पांचालस्तुततः सर्वं सुमंतुमभ्यपृच्छत ७८ मद्गुरुश्च पिता त्वं हि त्वं हि किंक
रवाणि ते पावकालं मनं मे स्याद्गुता हो हित पोधन ७९ अत्र स्थितो माथुरा
णां तीर्थानां सेवकोथवा त्रिरात्र कृच्छ्र पाराक चांद्रायणसमाधिना ॥८०॥ नव पा
दांतके वासं किं कृते सुकृतं भवेत ॥सुमंतुरुवाच॥ आकाशवाग्यदुद्दतितत्सत्यं
नान्यत्तं कृचित ॥८१॥ मथ्याप्रत्य दतः पूर्वं तव गात्रेषु पातकं दिने दिने स्नान
पूर्वं यातिचायाति निस्वशः ॥८२॥ आश्रमे स्मिन् स्थितो भूत्वा निर्मलश्च शशी
यथा ॥तिष्ठोपरिमितः पापा द्यावत्कालं च जीवसि ॥८३॥ इयं तु भगिनी पापादुपा
वृत्ता सती परं ॥सुगतिश्च विपाप्मा च भविष्यति न संशयः ॥८४॥ श्रीवाराहउवाच
॥एष प्रभाव स्तीर्थस्य मथुरायां वसुंधरे कुब्जगंगोद्भव स्यापि तथा कालंजर
स्य च ८५ सूकरस्य च माहात्म्यं तथा ते वर्णितं मया ॥यः शृणोति वरारोहे श्र
द्धया परया युतः ८६ पठते शृणुते वापि न स पापेन लिप्यते ॥सप्तजन्मकृतं पा
पं तस्य सर्वं व्यपोहति ॥८७॥ फलं च गोशतस्यापि दत्तस्य समवाप्नुयात् ॥अन्य
नत्वं च लभते स्वर्गलोकं च गच्छति ॥८८॥ इत्यादिवाराहपुराणे मथुरामाहात्म्ये कु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्मगंगाप्रभावोनामपंचविंशोध्यायः॥२५॥श्रीवाराह उवाच॥ शृणु चान्यद्धरा
रोहे कृष्णनारदयोः पुरा द्वारकांवसमानस्यमात्रणाप्रतिचागते १ सुखासीन
स्य कृष्णस्यपुत्रदारयुतस्यच आगतोनारदस्तत्रयदृच्छागमनोमुनिः २ पा
द्यमर्घ्यमासनंचमधुपर्कसभाजनं गांचगृह्ययथान्यायंकृत्वासंवादमुत्तमं
३ एकांतमितिवक्तव्यंकृष्णंगत्वाथनारदः उत्थायोत्पुलकोभूत्वाकृष्ण
याचस्मितंशृणु ४ तवपुत्रोयुवावाग्मीसुरूपश्चारुदर्शनः स्पृहणीयःसद
कांतःस्त्रीजनस्यसुरेश्वर ५ एतासांवरनारीणांक्रीडार्थंहिसुरेश्वर देव
योन्याद्दुस्तुभ्यंसहस्राणिचषोडश ६ यांवदृष्टाचसर्वासोच्युभ्यतेसम
नोभवः एतत्तेब्रह्मलोकेचगीयतेदैवतैःसदा ७ तत्स्वल्पयाद्येमायातोम
वल्पार्थंनिवेदितुं श्रूयतेचार्थवद्गीतंश्लोकंद्वैपायनेनच ८ कीर्तिमंतः
स्वर्गवासोनरकस्तुहिपर्ययात् दिवंस्पृशतिभूमिंचयस्यपुण्येनकर्मणा ९
यावत्सशब्दोभवतितावत्पुरुषउच्यते पुरुषश्चाविनाशीचकथ्यतेशाश्व
तोव्ययः १० नरकेपुरुषःप्राप्तोविपरीतोमनीषिभिः समाच्छंवसमाह
Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यतथादेवीगणांचयत ११ आसनेषूपविष्टानांतासांक्षोभंतुशौवत लत्त
यिष्याम्यहसर्वसस्यवासस्तमेववा १२ तावत्संख्यासनान्येवस्वास्तीर्णानिच
भागशः पत्रपत्रदलोपेतानिकृतानिमुनिनासह १३ सर्वासामुपविष्टानांत्र
यमंकेशवस्तदा पश्चाच्छांवंसमाहूयतत्राग्रेकृतसंपुटः १४ स्थितोमुहू
र्त्तंकिंकार्यमादिष्टास्याब्रवीत्तदा दृष्ट्वारूपमतीवास्यशांवस्यैववरस्त्रियः
१५ क्षुब्धोभभगवान्देवोऽनंगःसंस्मरणात्तथा उत्तिष्ठध्वंगृहान्सर्वान्गच्छ
ध्वंस्वंनिवेशनं १६ निगृह्यमानास्तेहोमाहस्त्रलग्नदलेनताः गताःसर्वा
यथायाताःशांवस्तत्रस्थितोभवत् १७ कृष्णेननारदंवीक्ष्यसलज्जमवनीमु
खं उक्तवान्स्त्रीसमुद्भूतंचरितंबहुविस्तरं १८ स्त्रीणांनास्तिरहोनास्तिनास्ति
कृत्येविभावना तेननारदनारीणांसतीत्वमुपजायते १९ रूपामाचवर्त्तिनी
श्रेष्ठागौरीचैवैकवाससा मध्यगंडाप्रगल्भाचवर्त्तनीतास्तथास्त्रियः २० सु
रूपंपुरुषंदृष्ट्वात्वरंतिमुनिसत्तम स्वभावएषनारीणांपुत्रस्यशृणुकारणं ६०
२१ आनिह्नुमानास्तेजस्वीधार्मिकोगुरुपूजकः रूपकारणमुद्दिश्यपगताः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

त्तोभंकथंचन २२ नारदस्त्वेवमेवंच अतिपूज्य हरेर्वचः अंतरंगउवाचेदं शां
बशापकरंतदा २३ यथाएकेनचक्रेणरथस्यनगतिर्भवेत् पुरुषास्वादना
मृतानन्त्वरंतियोबलः २४ शांबमुद्दिश्यवाच्यंहिसर्वमुत्पन्नमादितः अथ
स्करंमहद्भाग्यंयथेष्टंतत्समाचर २५ इत्युक्तमात्रेवचनेनारदेमौनमास्थिते
कृष्णेनशांबमुद्दिश्यविरूपकरणंमहत् २६ शापमुक्तेकुष्ठमयंरूपंदेहवि
नाशनं तत्क्षणात्पुष्पितांगः स्रवत्गलद्रुधिरबिंदुकः २७ पूतिगंधोमांस
पिंडः पश्यत्कीर्त्तिनोयथा ततस्तुनारदेनैवशांबशापविनाशनं २८ स
माहितंमहाधर्मआदित्याराधनंव्रती शांबशांबमहाबाहोशृणुजांबवती
सुत ॥ २९ ॥ उदयाचलेचपूर्वाह्णेउदयंतंविभावसुं नमस्कुरुयथायोग्यंवेदो
पनिषदादिभिः ॥ ३० ॥ त्वयोदितंरविःश्रुत्वातुष्टिंयास्यतिनान्यथा ॥ शांब
उवाच ॥ अगम्यागमनात्पापाज्ज्ञातोयःपुरुषोभवेत् तस्यदेवःकथंतुष्टोभवि
ष्यतिसवैमुने ॥ नारदउवाच ॥ भविष्यंपुराणमितितववादाद्भविष्यति ब्रह्म
लोकेपठिष्यामिब्रह्मणोऽग्रेत्वहंसदा सुमंतुमर्त्यलोकेचमनोःप्रकथयिष्य

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ति॥ ३३॥ श्रीदेव उवाच॥ कथं पूर्वाचले गंता मांसपिंडोपमो ह्यहं॥ पितृशापान्महा
दुःखं प्राप्तस्त्वस्म किल्बिषः॥ ३४॥ नारद उवाच॥ यथोदयाचले देवमाराध्य ल
भते फलं॥ मथुरायां च मध्याह्ने मध्यंदिनरवौ तथा ३५ प्रातर्मध्यापराह्णे च स्तूर्ये
धाराविलोपके॥ कृष्णगंगोद्भवे चैव सवत्तत्रैयमेवच ३६ एवं कुरु यथान्यायमे
कनेतु रवेः फलं॥ आराध्य श्रीदेवकुष्ठादि सर्वपापं जहिष्यसि ३७॥ श्रीवाराह
उवाच॥ ततः श्रीदेवो महाप्राज्ञः कृष्णात्मजो ययौ पुरीं मथुरां मुक्तिफलदां रवि
माराधनोत्सुकः ३८ नारदोक्तेन विधिना श्रीदेवो जांबवतीसुतः वरसूर्यं पूज
यामास उदयं तं विभावसुं ३९ कृत्वा योगं च चात्मानं श्रीदेवस्याग्रे रविस्तदा व
रं वृणीष्व भद्रं ते मद्धर्मप्रकटाय च ४० यत्नेपि तो नारदेन तत्तद्दृष्टं मम चाग्रतः
श्रीदेव पंचाशते श्लोकैर्वेदगुह्यपदैस्तवैः ४१ यत्स्तुतोहं त्वया वीर तेन तुष्टोस्मि
ते सदा स्पृष्टो देवेन संनागंतं तत्क्षणाद्दीप्तिमच्छविः ४२ व्यक्तांगावयवः साक्षा
द्वितीयो भूद्विर्यथा मध्याह्ने याज्ञवल्क्यस्य यजुर्माध्यंदिनीयकं ४३ अथा
पयेच्छांवस्तहितोर रविर्मध्यंदिनो भवत् वैकुंठपश्चिमे पार्श्वे तीर्थे माध्यंदिनीय ६२

के ॥ ४४ ॥ स्नात्वा माध्यंदिनं दृष्ट्वा सर्वपापैः प्रमुच्यते उदयास्ते ततो देवः शांबेन
सहितो विराट् ॥ ४५ ॥ स[illegible]कृष्णगांगायां दक्षिणे संस्थितस्तदा तत्र दृष्ट्वा तु
सायाह्ने रविमस्तो[illegible]प्रभुं ॥ ४६ ॥ सर्वपापविशुद्धात्मा परं ब्रह्माधिगच्छति ॥ श्री
वाराह उवाच ॥ एवं शांबस्य तुष्टेन मध्याह्ने तु नमस्तलात् द्विधा कृत्वात्मयोगे
न शांबमपोहितं ४७ शांब प्रयाहि तीर्थेषु तत्रैवांतरधीयत शांबस्तु सहस्रांशुं
णरथस्थेन दिवानिशं ४८ रविं संप्रच्छयामास पुराणं सूर्यभाषितं भविष्य
पुराणमिति ख्यातं कृत्वा पुनर्नवं ४९ शांबः सूर्यप्रतिष्ठां चकारयामास तत्त्ववि
त् ५० उदयाचले सहस्रांशुं यमुनायां तु दक्षिणे मध्ये कालप्रियं देवं मध्याह्ने
स्थाप्य चोत्तमं ५१ मूलस्थाने ततो गत्वा ह्यस्तमानाचले रविं स्थाप्य त्रिमूर्तिशां
बस्तु प्रातर्मध्यापराह्णके ५२ मथुरायां तथा चैवं स्थाप्य शांबो वसुंधरे स्वना
म्ना स्थापयामास पुराणविधिना स्वयं ५३ देवं शांबपुरं नाम माथुराणां कुलेश्व
रं तीर्थयात्रां तथा कृत्वा रविणा कथिता यथा ५४ माघमासस्य सप्तम्यां देवं
शांबपुरं नराः रथयात्रां प्रकुर्वंति सर्वद्वंद्वविवर्जिताः ५५ गच्छंति तत्परं स्थानं

सूर्यमंडलभेदकं ॥ एतत्ते कथितं देवि प्रशंसावशापसमुद्भवं ॥ पापप्रशमनाख्यानं
महापातकनाशनं ॥ ५६ ॥ इत्यादिवाराहपुराणे मथुरामाहात्म्ये प्रशंसावस्थापितसूर्य
प्रभावो नाम षड्विंशोऽध्यायः ॥ २६ ॥ श्रीवाराह उवाच ॥ शत्रुघ्नेन पुरा घोरो लवणः
सूदितो यदा द्विजानुग्रहकामार्थं मन्नमुत्सवरूपिणं १ मार्गशीर्षस्य द्वाद
श्यां मुपोष्य नियतः शुचिः यं करोति वरारोहे शत्रुघ्नाचरितं यथा २ द्विजानां
प्रीणनं कृत्वा सुद्धान्नवरदक्षिणां लवणस्य वधाद्देव शत्रुघ्नस्य शरीरके ३ ह
र्षितस्तु महातेजा तोरामस्याक्लिष्टकर्मणः अयोध्यायाः समायातो रामः सर्व
लवाहनः ४ महोत्सवं शत्रुघ्नस्य कर्तुं प्रियचिकीर्षया आगत्य हर्षपालितो
प्राप्य मथुरां दशरथात्मजः ५ एकादश्यां सोपवासः स्नात्वा विश्रांतिसंज्ञके
कृत्वा महोत्सवं तत्र कुटुंबसहितः पुरा ६ तस्मिन्मुक्त्वा यथाकामं तीर्थेतु
फलदं नृणां तस्मिन् [illegible] नि तत्रैव यः कुर्यात्तु महोत्सवं ७ सर्वपापविनिर्मु
क्तः पितृभिः सह मोदते [illegible] लोके चिरं कालं यावत्स्थित्यग्रजन्मनः ॥ ८ ॥ इ ॥ ६२ ॥
त्यादिवाराहपुराणे मथुरामाहात्म्ये रामतीर्थयात्रायां सप्तविंशोऽध्यायः ॥ २७ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ब्रह्मोवाच॥ तवापराधान्देवेश [illegible] जप्यान्यान्वैस्मचैनच निरापराधीमनुजोप्य
पराधीचजायते १ कर्म[illegible]याईयेनकारणेनजगुप्सिते तच्चपूजाफलंसर्वं
जायतेतद्दसमे २ [illegible] ३ च कर्मणामनसावाचायेपापरुचयोजनाः
अपराधमहास्तेतुविपरीतासुसाधवः ३ अज्ञानाच्चप्रमादाच्चयेषांप्राप्तमयाप
रं प्रायश्चित्तंदहेत्सर्वमपराधमलोत्थितं ४ भक्षणंदंतकाष्ठस्यराजान्नस्यतु
भोजनं मैथुनंशवसंस्पर्शंपुरीषोत्सर्गमेवच ५ सूतकुदक्यादीनांचस्पर्श
नंमेहनंतथा अभाष्यभाषणंकोपः पिण्याकस्यचभक्षणं ६ रक्तपारक्य
मलिनवस्त्रधारित्वनीलजं गुरोरलीकनिर्बंधपतितान्नस्यभक्षणं ७
अभक्ष्याभक्षणंचैवतंडुलीयविभीतकं अविस्तीर्णनवान्नस्यजालपादस्व
राकयोः ८ भक्षणंदेवतागारेसोपानस्योपसर्पणे तथैवदेवपूजायांक
र्णिपकुसुमार्चनं ९ अनिर्माल्यस्यवैविष्णोनमस्करणमेवच पानंसुरा
यादेवस्यविनातूर्यप्रबोधनं १० वार्त्तीकमोर्चनेविष्णोः पूजाजीर्णोधका
रयोः अपराधास्तुद्वात्रिंशत्कृत्तोविश्वंनपश्यति ११ दूरस्थाननमस्कारं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कुर्यात्पूजासरात्रसी एकरात्रं द्विरात्रं च त्रिरात्रं स्नानमेव च १२ साचासाः
पंचगव्याशी मलवस्त्रादिकं क्रमात् नीलीरंगापनोदार्थं गोमयेन प्रघर्षणं
१३ प्राजापत्येन शुद्धिः स्यान्नीलीसूत्रस्य धारणात् चांद्रायणद्वयं कुर्याद्
रोः क्षमितमुत्तमं १४ चांद्रायणं पराकं च पतितान्नस्य भोजनात् चांद्राय
णं पराकं च प्राजापत्यं तथैव च गोप्रदानं भोज्यं च अभक्ष्यभक्षणे कृते कृतो
पवासपंचानां पंचगव्येन शुद्ध्यति १६ सोपानत्कश्चरेत्पादं कृच्छ्रस्य द्विज
भोजनं पुष्पाभावे चार्चने स्नाने देवस्य पंचधाचरेत् १७ अनिर्माल्यनमस्का
रे स्नानं पंचामृतेन तु सुरापेण द्विजातीनां चांद्रायणचतुष्टयं १८ अर्थेव
द्वादशाब्दं च प्राजापत्यत्रयं चरेत् ब्रह्मकूर्चेन शुद्धिः स्याद्गोप्रदानत्रयेण
च १९ त्रयाणामेकरात्रेण पंचामृतनिषेवनात् मुच्यते सर्वपापेभ्यस्तथा
निःस्पृस्तवान्पठन् २० एतत्ते कथितं गुह्यं किमन्यच्छ्रोतुमिच्छसि पुनः पुन
रुवाचेदं देवदेवो जनार्दनः २१ मोहं गतानश्रुणु तेन दृष्टसंज्ञे वलक्ष्यते मु
हूर्तमात्रे सा देवी ससंज्ञा लिदमब्रवीत् २२ अपराधकृते देवस्तत्कीदृश ६३

जायते प्रायश्चित्तानि भूरीणि दुष्कराणि नरैः सदा २३ तेन ते मनसो मो
हो दुःखदो हि समस्पृशात् अस्ति कश्चिदुपायोत्र येन त्वं न्वतुष्यसि २४
पूजितः सफलेश्च सर्वापराधविशोधनं ॥श्रीवाराह उवाच॥ संवत्सरस्य म
ध्ये च तीर्थे शूकरके मम २५ कृतोपवासः स्नानेन गंगायां शुद्धिमाप्नुया
त् म[illegible]पुरायां तथाप्येवं सापराधः शुचिर्भवेत् २६ अनयोस्तीर्थयोरे
कं यः सेवेत सकृन्नरः सहस्रजन्मजनितानपराधाञ्जहाति सः २७ स्ना
नात्पानात्तथा ध्यानात्कीर्त्तनोच्चारणात्तथा श्रवणाद्दर्शनाच्चैव मनयो
र्नास्ति पातकं २८ ॥पृथिव्युवाच॥ मथुरां शूकरं तच्च द्वावेतौ तव वल्लभौ वि
शेषमनयोः कस्य ब्रूहि सत्यं सुरेश्वर २९ ॥श्रीवाराह उवाच॥ पृथिव्यां यानि
तीर्थानि आसमुद्रसरांसि च कुब्जाम्रकं प्रशंसंति सदा मद्भावभाविताः ३०
तस्मात्कोटिगुणो गुह्यः शूकरस्तीर्थसत्तमः एकाहं मार्गशीर्षस्य द्वादश्यां
सितवेत्सवं ३२ गंगासागरकं नाम पुराणे परिपठ्यते गुह्याद्गुह्यतरं गुह्यं
माथुरं मम मंडलं ३२ फलं पराई गुणितं सित तीर्थान्तसंश्रयः अटि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वतीर्थानि कुब्जाम्रादीनि निस्पृहः ३३ भ्रमं न प्राप्नुते मे प्राघं मथुरामागतस्य
हि विश्रमणाच्च विश्रांतिस्तेन संज्ञा वरानन ३४ सारात्सारतरं स्थानं गुह्यानां
गुह्यमुत्तमं गतिमन्वेषमाणानां मथुरा परमा गतिः ३५ कुब्जाम्रके सूकरके
मथुरायां विशेषतः विना सांख्येन योगेन मुच्यते नात्र संशयः ३६ या गति
र्योगयुक्तस्य ब्रह्मतत्त्वस्य मनीषिणः सा गतिस्त्यजतः प्राणान्मथुरायां नरस्य
च ३७ एतत्ते कथितं सारं मया सत्येन सुव्रते॥ न तीर्थं मथुराया हि न देवः
केशवात्परः ३८ तस्मात्ते मोहजननी या बुद्धिः पूर्वसंस्थिता॥ सा स्थिरा न
चलाप्राश्य न मथुरा प्रति भामिनि॥३९॥इत्यादिवाराहपुराणे मथुरामाहात्म्ये
प्रायश्चित्तभंजने नाम षष्टाविंशोऽध्यायः॥२८॥श्रीवाराह उवाच॥पुनरन्यत्प्र
वक्ष्यामि पितॄणां तृप्तिकारकं ध्रुवतीर्थे पुरा वृत्तं तन्नु शृणुष्व वसुंधरे १ त्रयु
स्यां पुर्यां तु राजासीद्धार्मिकः सज्जनप्रियः चंद्रसेनेति नाम्ना च यज्वा दा
ताहितेरतः २ तस्य भार्ये ख्याते द्वे च कुल शीलवयोयुताः तासां मध्येऽधि
.... पतिव्रतपरायणा ३ नाम्ना चंद्रप्रभा चैव वीरसूर्वीरपुत्रिका त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जायते साशतस्यैकादशे नाम्ना प्रभावती ४ तस्याः परिग्रहस्त्वेकाक्लिष्टा
चारातिहीनका भुजिष्या सर्ववर्णैः सा मद्यमांसरतिप्रिया ५ विरूपनि
धिनाम्ना च सा दासीदासचेटिका तस्याः पितृगणाः सर्वेऽतीताः स्थानसं
स्थया ६ तेऽपि ते च्युताः स्वर्गाद्योनिशूकरकारिभिः शूकरोनरकाये
न कुलस्थानां कुलस्य च ७ कदाचिदपि तस्या यो भ्रष्टः पितृगणो महान्
सूक्ष्मप्राणिसमूहोत्थो ध्रुवतीर्थेन तत्राभवत् ८ कृमिरूपाश्च क्रमंति
मशकाकारसन्निभा दृष्टास्ते ऋषिणा तत्र त्रिकालज्ञेन भामिनि ९ यष्टा
न्नाकालभोक्त्रा च तपोव्रतपरेण च मौनव्रतपरस्थेन सूर्यगत्यास्थितेन
च १० तस्मिन्दिने न च कृतं व्रतं जाप्यं विमोहनात् कृपाविष्टाभिभूतस्य
कौतुकेन निरीक्षितः ११ चतुर्थ्यां श्रावणे शेषं च दिवसं परिवर्तते एके तत्राग
मिष्यंति पितरो नभसागताः १२ अन्ये पूर्वोत्तरादेष्या दक्षिणात्पश्चिमाच्च
या केचित्स्वभावतो हृष्टाः केचित्सुतैः स्वधाकृताः १३ हृष्टास्तुष्टाः सुपुष्टां
गागच्छंति दिविसंघशः केचिन्नागसमायाता रूक्षाः क्षामशरीरिणः १४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स॰मा॰
६५

वस्त्रालंकारपुष्टांगा हृष्टा गच्छंति संघशः तथापरे नग्नदेहाः सुपुष्टा यांति तत्र
वै १५ अन्ये यथागता यांति आयांति पुनरेव हि यानैरुच्चावचैः केचिन्नानारू
पैः खगैस्तथा १६ समागच्छंति गच्छंति ईरयन्तोपि प्रमुदा केचिद्यथागता
यांति क्रुद्धाः शापप्रदायिनः १७ निम्नतो दूरतस्ताश्च गच्छंति सुविमानिताः
संमानितास्तथान्ये तु पितरः श्राद्धपूजिताः १८ महोत्सवमिहालक्ष्य वि
स्मितो मुनिरुत्थितः गते पितृगणे पुत्रास्स कलत्रा गृहान्ययुः १९ निर्जनं
भुवनीर्थं तु वृत्तवेलमिवाभवत् तत्रैकान्ते कृशांगोथ चतुस्तामः स्मृतिविह्व
लः २० वेपथुः कोटरान्तश्च दृष्टलग्नउदरः [illegible] मोस्थि धृतत्वङ्
जृंभमाणो निश्वासकृत् २२ नवाचाश्रूयतेलस्य तुद्रूपत्तेरिवोदिता॥ त्रिस
लउवाच॥ को भवान्विकृताकारो वेष्टितो मशकैर्बहु न गच्छसि यथास्था वे
नमागतस्त्वं निरुद्यमः यथावत्प्रच्छते मह्यं कथयात्मविचेष्टितं २३ ममा ६५
द्यनैत्यकं कमैतीथेस्मिन्नपश्यतो निशं दृमानुच्चावचाञ्जंतून्नकर्तुं गच्छतेम
नः २४ त्वां दृष्ट्वैव हृदयं [illegible] कृपा मे संगतात्वयि विश्रब्धः कथयास्माकं किंक

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रोतिचनेहितं ॥२५॥ सूत उवाच ॥ इहन्निमित्तमद्यैवपितॄणांतृप्तिकारणं ध्रुवं
तीर्थेतुयःश्राद्धंपुनःकुर्यात्तिलोदकं २६ तेनतत्स्नादिवंयांतिपितरस्तेनपु
त्रिणः सोहंस्वान्नरकोद्धृतस्तत्प्रसादंतुवुमुक्तितः २७ योनिष्ठांकरदोबेतान
रकंसमुपाश्रितः पाशैःशतैश्चवद्धोहंशातवर्षैरिहापितः २८ अगतिर्ग
मनेमेस्याद्येयेमेद्यसमागताः संतानपुष्टवपुषोदत्तश्राद्धकृतोदकाः २९
वलवंतोययुःस्वर्गंनतथाहंदयालुक येषांसंततिरत्नष्पातिष्ठतीहप्रजा
वतां ३० तेस्वधापूजिताःपुत्रैर्गच्छंतिपरमांगतिं अद्यरात्रस्तुपितरश्चेद
सेनस्यपूजिताः ३१ इष्ट्वास्त्वयात्रिकालस्तद्दिव्यहृद्ध्यादिवंगताः ब्राह्म
णानांचवैश्यानांशूद्राणांपितरस्तथा ३२ प्रतिलोमानुलोमानांसुतानां
श्राद्धकर्मणं सर्वेषांचत्वयाहृष्टायेषांसंततिरव्यया ३३ एवंपृष्टःसा
विप्रेणपुनःपप्रच्छकारणं कौतुकाविष्टहृदयोज्ञानाविष्टेनचेतसा ३४
तवापिसंततिस्तातनास्तिद्यावद्यथोचिता तथापिचित्तविज्ञानालक्ष
याम्यहमेवते ३५ यदिकश्चिदुपायोत्रमयालब्धहिनैविणा वदसर्वंक

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रिष्यामियदिप्राक्यंभवेन्मम ३६ ततःसकथयामासदुःखंपितृगणैर्वृतः यद्
मेमेशरीरेतुभवंतिमशकाःकृशाः ३७ संतानपद्धयादित्तेममदेहंसमाश्रि
ताः तंतुमात्रमहंतेषांममतंतुमयीसहन् ३८ अस्तिनगर्य्यांमध्येतुचंद्रसे
नस्यवेश्मनि महिष्याःप्रेषणेनित्यंदासीनाम्नाप्रभावती ३९ तस्यादासी
कर्मकरीविरूपनिधिनामतः अस्माकंसंततेस्तंतुस्तस्याःश्राद्धकृतेवयं ४०
आशयावद्धहृदयाःश्राद्धतर्पणहेतवे स्थितास्तावदेवंचकालंयास्या
महाशुचौ ४१ नरकेत्वप्रतिष्ठेतु निराशाःस्वेन कर्मणा अतुलेतत्सत्रिका
लतोमाहाविष्टोब्रवीदिदं ४२ कथंनिष्कृष्टयोन्यायदत्तंचापद्यतेहविः
विधिरत्रकथंतस्यायेनयूयंसपुत्रिणः ४३ प्रोवाचसत्रिकालज्ञांज्ञानदृष्टं
मात्र[illegible]पूर्वकर्मविपाकेनयांयांगतिमधोमुखाः ४४ ऊर्ध्वास्याश्चा
मात्रमध्येतुदर्शयोर्मासि मीहते श्राद्धपिण्डोदकंदानेनित्यनैमित्तिकंतथा
५६ अर्घपात्रान्नसंकल्पैस्तितरस्तेनपुत्रिणः इतिस्मृतिःसुपिकुलेस्मा
त्कस्यकर्मणि ५७ गोत्राणिछ नदीषुबहुतोयासुशीतलासुविशेषतः पि ६६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रोतिचनेद्दितं ॥२५॥उासी... चार्श्राञ्जलांजलीन् ४७ रोप्पस्पेतलेनाथनामिद
नीर्थेतुयः श्राद्धं पुनः कुर्या... त्रिगोत्रपितानामसमुच्चरन् ४८ नामशर्मीत्त
त्रिणः सोहंस्वान्तरकोगाहरन् श्रादावंतेंजलीद्वौतुत्रीणिमध्येसमंततः ४९
रहं ... ातवमत्रमंत्रंप्रतिक्रिया उदीरतामंगिरसन्त्रायंतुनइतिल
च ५० पित्रेप्रथमतोदद्यान्मत्रेदद्यात्तथात्वरं गोत्रमातानामदेवीत्तप्यले
वंस्वधोच्चरन् ५१ एवंपितामहः शर्मीगोत्रेमातामहस्तथा ऊर्द्धं पितृन्प्याय
श्वेदपिता... इहोच्यते ५२ मधुवातात्वचासिंचन्पूर्ववत्परिकीर्त्तयेत्
पितामहीप्रपितामहीमातृवत्यतिनासह ५३ एवंमातामहानांचपूर्वव
क्रमशोबुधः नमोवइतिमंत्रेणप्रत्येकंत्रितयंत्रिषु ५४ मंत्रोच्चारंपृकुर्वी
तऋस्यांनसराम हे गोत्रायपित्रेमहायशर्मणेचेदमासनं ५५ गोत्राये
मात्रेमहेतुदेव्येचासनकर्मणि गोत्रमहपितृःशर्मनगोत्रेमातर्देवीमही
५६ अर्घेपात्रान्नसंकल्पेपिण्डदानेचतेजने गोत्रस्यपितुर्महस्यशर्मणो
ऋस्यकर्मणि ५७ गोत्रायामातुर्मह्याश्चदेव्याश्चातप्पकर्मणि आवाह

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नेद्वितीयाचचर्येतुर्थ्येकमेणि ५८ प्रथमाचाशिषःप्रोक्तादत्तस्यात्तर्प्यकार
का श्राद्धप्रश्नेतथाषष्ठीपंचमीपूजनेस्मृता ५९ निमित्तेसप्तमीप्रोक्तागो
त्रेप्रोक्तास्तुयापिता गोत्रेपितर्प्येणेप्रोक्तः पितातर्प्यणकर्मणि ॥६०॥ पितुर
त्तर्प्यकालेतुपितॄणांदातुमत्तयं एवमेतत्सुपुत्रेणभक्तिपूर्वंद्विजेनतु ॥६१॥
वार्यपिश्रद्धयादत्तंतदानंत्मायकल्पते अश्रद्धयाब्राह्मणेनैवंयथाश्राद्धवि
धिक्रियं ॥६२॥ कृत्वाश्राद्धस्यपितरोहृष्टामुमुदिरेसदा ॥ जोषमास्त्वत्रिका
लज्ञगच्छामोनरकायवै ॥६३॥ पूर्वकर्मविपाकेनचिरंनिवसितुंमुने ॥ त्रिका
लज्ञउवाच ॥ येमयाचागताहृष्टातीर्थेस्मिन्पितरोद्यवै ॥६४॥ वहवःस्वस्थम
नसोवहवोस्वस्थमानसाः ॥ पुत्रदत्तंयथाश्राद्धंमग्नाघोहिनरूपिणः ॥६५॥
मोनेनगच्छतांनेषांकिमेतद्दृद्दनिश्चयं ॥ अगस्तिरुवाच ॥ त्रेदंनिश्चयंश्रा
द्धेपुत्रस्यविकु[illegible]त् ६६ नैराघ्रपकारणंकिंचित्तन्मेनिगदतःशृणु
श्रद्धेश्राकाले[illegible]ः पिता[illegible]हीनमदक्षिणं ६७ अपात्रेमलिनंद्रव्यंमहापा
तकतोर्जितं[illegible]यवं[illegible]पात्रेयंदुष्टप्रोक्षितमीक्षितं ६८ तिलमंत्रकुशै ६७

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धेनासीन
हीनमासुरं । वैरोचनाय देवेन वामनेन विभूतये ६९ सच्छिद्रस
दमैत्
हिमाद्रुस्य पुराकिल तथा द्वापरे श्रीरामो हत्वा राक्षसमीश्वरं ७०
रावणं सगणं घोरं तुष्टेन सह सीतया श्रुत्वा भक्तिं च रोद्रस्या त्रिजटाया
स्त्रिलोककृत् ७१ सीतावाक्यप्रतुष्टेन तस्यै प्रादाद्वरं प्रभुः अष्टचानि
गृहाण्येव तथाश्वाद्वेहवीर्षि च ७२ क्रोधाविष्टेन दत्तानि विविधपात्रायुता
नि च पादाशौचमनाभ्यंगं प्रतिश्रवसभोजनं ७३ त्रिजटे ते प्रयच्छामि
यच्चश्राद्धमदक्षिणं तथैव शंभुना दत्तं नागराजाय भक्तितः ७४ वासुक
ये सुतुष्टेन तन्मे निगदतः शृणु अनुज्ञाप्य व्रतं जंतुर्वार्षिकीः सफलाः क्रि
याः ७५ यज्ञस्य यो वितादेयाद्दक्षिणां न ददाति यः व्यथाशापथकारी यो
देवब्राह्मणसन्निधौ ७६ अशौचियाणि श्राद्धानि क्रियामंत्रविहीनकाः
सन्निवासे च स्नानं यद्व्यासत्वैः स्वरूपतः ७७ पिष्ठ्यायननमेनत्याग
हं ज्ञानप्रदायकं तस्यैव प्राकृतं धर्मं मम श्रेयं च करिष्यति ७८ सर्वं तुभ्यं म
यादत्तं नागराजाय वार्षिकं इत्येतद्धि पुराणेषु सेतिहासेषु पद्यते ७९ तद्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

म॰मा॰
६८

ध्यलीककरणं श्राद्धं दानं व्रतं तथा नोपतिष्ठन्तु ते यांतु तेन नग्नाश्च यस्त्वया
८० मुषित्वाच्छिद्रकरणे तद्दानफलभोक्तृभिः यथागतास्तथा ते तु श्राद्धेम॰
तास्तु निष्फलाः ८१ मौनव्रतधरा यांति पुनः प्रासस्य हेतवे एवमेतन्महा
प्राज्ञ यन्मां त्वं परिपृच्छसि ८२ ॥त्रिकालज्ञ उवाच॥ षष्टे काले भोजनं त्वद्य नाहं
भोक्तुमिहोत्सहे यावच्च स्त्रिनेते भयाद्दृष्टाहं त्वां स्थिरो भव ८३ तावत्कालं
प्रतीक्षस्व यावदागमनं मम अस्मिन्तीर्थे सदैवाहं दिवारात्रमतंद्रितः ८४
सोहमद्य व्रतं त्यक्त्वा तव कारुण्ययंत्रितः यास्त्रियं ते वसान्निध्यं कांक्षितां
सुचिरं त्वया ८५ आनयित्वेह श्राद्धं वः कारयिष्यामि तामहे एवमुक्त्वा च षष्ठ्यां
पूर्णिमानवाकांक्षयमीडुतः ८६ राजा समीपगं दृष्ट्वा कस्मिंश्चेन्नृपसत्तदा दि
नौतले विलुलितं पादौ ह्कुलातु मद्दुनि ८७ धन्योस्म्यनुगृहीतास्मि यज्ञ
वानागृहमागतः सदा यत्नं करिष्यामि त्वत्समागमनं गृहे प्रति ८८ अद्य मे
सफलं जन्म यज्ञवान्स्य समागतः इदं पाद्यमिदं चार्घ्यं मधुपर्कमिदं च
गोः ८९ महामुनि शार्दूल येनाहं शांतिमाप्नुयात् न स्पतत्प्रतिगृह्या

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रुत्वामुनिस्त्विदमब्रवीत् ९० मदीयागमनेराजन्शृणुत्वंकारणंयथा त
कृत्वाकुरुतत्तीर्थंयेनाहंतोषितोभवं ९१ एवमुक्तेसुराजर्षिरब्रवीत्तं
तपोधनं किंतद्ब्रूहियथाकार्यंयेनसिद्धंचदृश्यसि ॥९२॥ त्रिकालज्ञउवाच ॥
यासौतेराजन्महिषीतामानयवरानने तस्यादासीप्रभाचेतितांचानयम
हामते ९३ ततश्चांतःपुराद्देवीसदासीतत्रचागता त्रितौविलुलितासा
ध्वीप्रणाममकरोद्द्वयोः ९४ समासीनांचविप्रेंद्रःप्रोवाचकरसंपुटां श्रद्
तीर्थंध्रुवंकरेमयाश्चर्यंशुचिस्मिते ९५ यद्दृष्टंतत्रवैसर्वंशृणुध्वंसहमं
त्रिभिः येकेचित्पितरोलोकेलोकानांसर्वतःस्थिताः ९६ तेपूजिताःश्राद्ध
कृद्भिःपुत्रैःप्रीतादिवंययुः एकोऽद्भुतरसस्तत्रसूत्तमप्राणिभिरावृतः ९७
क्षुत्क्षामदेहःशुष्कास्योनिर्गतोदरसूत्दमहक निराशोगंतुकामश्चपुनः
सनरकेप्रचौ ९८ कारुण्यात्समयापृष्टःकस्त्वंब्रूहिकिमित्त्वासि तेनात्म
कर्मजनितंममसर्वंनिवेदितं ९९ ततस्तत्रैवतंदृष्ट्वातस्यकारुण्ययंत्रि
तः तवदास्याश्चयादासीतस्यास्तनुःकिलोच्यते १०० नाम्नाविरूपकनिधि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्त्वामानय वरानने इति श्रुत्वा न वद्यांगी तस्या आनयितुं त्वरा १०१ प्रेषया-
मास सर्वत्र भर्त्स्यांश्चक्री ब्रह्मिहानय साचैकांते दिवा किंचिन्मद्यपानरतानु
हि १०२ पुरुषेण सहासीनां तत्र दृष्ट्वा तु सेवकाः करे गृहीत्वा त्वरिता मुनेर
ग्रे स्थिता भवन् १०३ तां दृष्ट्वा मद्यलिप्तांगीं मम नो तां वरां भृशं उवाच प्रस
यार्थं वै मुनिः पितृयुतां क्रियां १०४ अद्य त्वया पितॄणां च कृते दत्तं स्वधाकृ
तं दानं चोदकनिर्वापं कस्मैचिद्ब्राह्मणाय च १०५ नानैव मिति सा वाचेदंत
म्रपि संस्थितव्रतं न जानामि पितृन्त्वोन्वे क्रिया कार्यं च वै विभो १०६ इ
ति ब्रुवाणां तां दासीं त्रिकालज्ञोप्युवाच ह पत्नीं च मधुरैर्वाक्यैरूपसंपर
सज्ञानं १०७ सर्वे दृष्ट्वा च माहात्म्यं पितॄणां ततः फलं सकौतुकं महाभागाः
श्राद्धदानस्य चैव हि १०८ ब्राह्मणान गरे सर्वे भुक्तभोज्याः सुपूजिताः ते
नीताश्राद्धकर्मार्थं श्राद्धिकं गृह्य सत्वराः १०९ तत उद्दिश्य रावसत्सु सर्वलो
ककुतूहलात् आगतो ध्रुवती थे तु राजा सर्वजनैर्वृतः ११० तत्रात्ययथा ६
जंतुं नष्टसंज्ञम चेतनं अड्डाहस्तन्सर्वे लोका सुमप्याके वै स्थिते ततः १११ उ

वाचसतदाविप्रस्तवसंननताश्चियः॥ मयैयातवतुष्टायैमानीतावरयद्धि
तं॥ ११२॥ अगतिरुवाच॥ स्नात्वैषाधुवतीर्थेतुब्राह्मणानांक्रमेणवै करोतुत
र्प्पणंचास्माकंयेनपूर्वंयथाक्रमं ११३ ततस्वर्णंचरौप्यंचवस्त्रदानंविलेप
नैः अर्चित्वापिंडदानंतुकरोत्वेषाचभक्तितः ११४ अत्रैवचवयंसर्वेहृष्टा
रोभवितास्वयं कारयित्वाचसासर्वंयथोक्तंजंतुनातदा ११५ ब्राह्मणाव
हवस्तत्रवृताःश्राद्धकृतेवराः राजापत्न्याचद्विगुणंश्राद्धार्हेवरदक्षिणं
११६ पट्टवस्त्रंतथाधूपंकर्पूरागुरुचंदनं तिलोत्तरंतथान्नंचबहुरूप्यंसद
क्षिणं ११७ ददापितंसमग्रंवैविरूपनिधिहस्ततः कृतेश्राद्धेपिंडदानेस
जंतुःसुकृतीयथा ११८ दिव्यकांतिरदीनात्मा तथाभूतःपृथक्पृथक्
वेष्टितःशुशुभेतीवदीप्तितोवभ्रण्यांतरे ११९ स्वर्गागतैर्विमानैश्चस्था
पितंतत्रचैनभः तेषांमशकमात्राणांमतिमात्रस्वरूपिणां १२० ततस्तु
दृष्ट्वागणाजंतुर्विमानान्त्रेस्त्यचागतान् गंतुंस्वर्गमुवाचेदंत्रिकालज्ञंनृपं
जनं १२१ अएवंतुव...नंसर्वैमद्वी...ति...नःशेष...

...पि पठते श्रद्धया युक्तः प्रा... ...नाशन

समुद्राः सर्वतोत्तमाः १२२ कुरुक्षेत्रं गया चैव ... पितृ...
मुक्तिदं चान्यत्स्मृतं न भविष्यति १२३ आषाढ्याः पंचमे पक्षे प्रतिपत्स्थ
तिस्तथा शुक्लप्रतिपदं तं च तीर्थादि प्राप्य सत्वराः १२४ पितरः श्राद्ध
पिंडोदाशाश्रमे ध्रुवमास्थिताः कृत्वा प्रेतपुरीं शून्यां स्वर्गं पातालमेव
च १२५ ईहमानाः स्वकं पुत्रं गोत्रजं तं तु मथ्यानुजं कन्यागते सवितरि य
श्राद्धं संप्रदास्यति १२६ तर्प्पणं ध्रुवतीर्थे यो तीर्थानां याउ शांतरे सुत
प्तास्मा वयंश्च [redacted] श्च द्यास्यामः परमां गतिं १२७ एवमेव प्रभावोस्य ध्रुव
स्य कथितो मया दृष्टमवद्भिः सर्वं पदस्माकं सुदुर्लभं १२८ दुस्तरं त
रितं पापं श्रद्धाभक्तिकरं महत् ॥ इति विप्रस्य वचनमाकर्ण्य मनसं नृपे जनं
१२९ राजपत्नी तथा दासी स्वासुतां शिवमस्तु वः ॥ आरुह्य च विमाने स्ते
गताः स्वर्गं हृतामरैः ॥ १३० ॥ श्रीवाराह उवाच ॥ ततः स राजशार्दूलः सगणः प
रिवारकः दृष्ट्वा तीर्थस्य माहात्म्यं प्रणम्य ऋषिसत्तमं १३१ प्रविष्टो नगा ७०
रीरम्यां संस्मरन्नित्यमच्युतं ॥ एतत्ते कथितं भद्रे मथुरामाहात्म्यमुत्तमं १३२

श्रवणाद्यस्य पापानि नश्यंत्येव पूर्वजान्यपि पठते श्रद्धयायुक्तो प्रा...
सन्निधौ १३३ सपितॄन्तर्प्येयेत्सर्वान्नभिगम्यगयाशिरं ॥ एतत्त्वयोनाश्रुत
तेनचाशुश्रूषवेनया ॥१३४॥ कथनीयं महाभागे यश्चनार्चयते हरिं ॥ तीर्थानां
परमंतीर्थं धर्म्माणां धर्ममुत्तमं ॥१३५॥ ज्ञानानांपरमंज्ञानं लाभानांलाभमुत्त
मं ॥ श्रवणीयं महाभागे पुण्यं भागवतं सदा ॥१३६॥ सूत उवाच ॥ एतच्छ्रुत्वाप्र
मोवाक्यं धरणी विस्मयान्विता ॥ पुनः पप्रच्छ मुदिता प्रतिमास्थापनं तदा
॥१३७॥ इत्यादिवाराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये ध्रुवतीर्थप्रभावो ना
मैकोनत्रिंशोध्यायः ॥२९॥ समाप्तमगमत् ॥ शुभमस्तु ॥ संवत् १९०२ शाके
१७६७ उत्तरायणे श्री सूर्ये वसंतऋतौ वैशाखशुक्ला १४ सूर्ये श्रीमन्मथु
रायां रामघाटनिकटे यमुनातटसमीपे लिखितमिदं पुस्तकं लक्ष्मणप्र
साद ब्राह्मण जाती गौड स्वपठनार्थं शुभं भूयात् श्रीकृष्णायनमः श्री

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

NO 13

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry